तिलतैलेन गोमूत्रे आरनालकुलुत्थके ।
स्वर्णादिसर्वलोहानां शुद्धिर्भवति निश्चयम् ॥

End:

नालिकेरफलस्थाता साङ्गशीतं पिबेज्जलम् ।
इक्षुपाने फलं[यः]भक्ष्यं तक्रभुक्तं यदिष्टितम् ॥
ब्रह्मास्त्रसूतविख्यातं ब्रह्मणा योगजीवितः ।

No. 13104. औषधयोगग्रन्थः, आन्ध्रटीकासहितः.

AUṢADHAYŌGAGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, $11\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 116. Lines, 8 on a page. Character, Telugu. Condition, good Appearance, new.

Incomplete.

Similar to the above. In the beginning three leaves are found to contain some information relating to medicine.

Beginning:

अक्षयस्य लघुद्रावि तेजस्वी निर्मलोत्थितम् ।
आधारं पुनरावृत्तिबद्धसूतस्य लक्षणम् ॥

* * * *

त्रिफलं च वचामोदं पत्रिकण्टकटङ्कणम् ।
नागरं ब्रह्मबीजं च त्रिफलादिकचूर्णकः ॥

* * * *

पारदस्य पलं शुद्धं लोहं खल्वे विनिक्षिपेत् ।
वृश्चिकाक्षीरसंमर्दं नारीस्तन्येन संयुतम् ॥
आत(पे)शोषयित्वा तु रसं दत्वा पुनः पुनः ।
एकविंशतिवाराणि मर्दयित्वा विचक्षणः ॥
दत्त्वा गन्धस्य तगिले(?) समांशं मर्दयेत् दृढम् ।
तद्रसं लोहपात्रेषु क्षिप्त्वा मन्दाग्निना पचेत् ॥
अरुणोदयसङ्काशं रसं बन्धूकपुष्पवत् ।
सिद्धयोगमिदं दिव्यं स्थलसिन्दूरमेव च ॥

शतवेधस्य ताराणि निर्बीजं कनकं भवेत् ॥

* * * *

हरीतक्या फले तोयं गन्धकं शतभावितम् ।
ताम्रपत्रविलेपेन पुटी भवति काञ्चनम् ॥

End:

शृङ्गी कटुत्रयफलत्रयकण्टकारि भार्गेन पुष्करजटा लवणानुशेषान् ।
चूर्णं पिबेद्धिमलमुष्णजलेन युक्तं श्वासोक्तवातकफकाशविनाशनेषु ॥

No. 13105. औषधयोगग्रन्थः, द्राविडटीकासहितः.

AUṢADHAYŌGAGRANTHAḤ WITH TAMIL MEANING.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 176. Lines, 7 on a page. Character, Grantha and Tamil. Condition, injured. Appearance, old.

Incomplete.

Similar to the above, but with Tamil meaning.

Beginning:

धातकीवत्सनाभश्च पारदं हिङ्गुलस्य च ।
नवसारश्च तालश्च तुत्थं टङ्कण . . . . ॥

* * * *

वज्रवल्ल्यादिकं भृङ्गी कुण्डली च पुनर्णवम् ।
प्रत्येकश्च रसं प्रोक्तं बदरश्च पृथक्पृथक् ॥
तत्कषायरसे युक्ते दशमुण्डगुलं क्षिपेत् ।
विष्णुकान्त्या जटावल्या(प)रमं जीरकद्वयम् ॥
मरीचं शृङ्गिबेरश्च रजनीकतकं फलम् ।
पिप्पली पिप्पलीमूलं तच्चूर्णं कुन्तमेव च ॥
आज्यतैलस्य कुडुबं प्रत्येकञ्च विनिक्षिपेत् ।
शोभोपाण्डुमयं हन्ति ग्रहिण्यादिविनाशनम् ॥
गुल्ममष्टविधं चैव क्षयकासान् विनाशयेत् ।

End:

अमृतकनकमूलन्नागराणाम् अमृतनागरदुस्पृहाम्बुदानाम् ।
अनिलज्वरनाशिनौ कषायौ कथितावागमकोविदैर्भिषग्भिः ॥

. . . . चित्रकनागरैः ।
पाठाविलङ्गेन्द्रयवाहिङ्गुभार्गवचान्वितैः ॥
सर्वपातिविषाजाजीरेणुका कृष्णजीरकम् ।
गजाह्वा सा . . . . ॥

* * * *

हरति दाहत्रयाद्यमम्बाम् ।

No. **13106.** औषधयोगग्रन्थः, आन्ध्रटीकासहितः.

AUṢADHAYŌGAGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 16⅝ × 1⅛ inches. Pages, 98. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Dravyaguṇapāṭha 50*a* and 111*a*, Jyautiṣadarpaṇa 103*a*, Pathyāpathyavivēka 105*a*.

Incomplete.

Similar to the work described above, but with meaning in Telugu.

Beginning:

बिन्दवः पचि(ति)तास्सप्त शक्रस्य पिबतोऽमृतात् ।
मनुष्याणां हितार्थाय भूमौ जाता हरीतकी ॥
विजया रोहिणी चैव पूतना च मृता. तथा ।
जीवन्ती त्रिवृता चैव अभया चेति सप्तधा ॥
मलये विजया चैव रोहिणी सिन्धुदेशके ।
यवन्ती पृथुनामा च श्रीशैले च मृता तथा ॥
जीवन्ती च कुरुक्षेत्रे काश्मीरे त्रिवृतं तथा ।
अभया विन्ध्यदेशेषु इत्येते देशजन्मकाः ॥

End:

आदौ तु सूतकं शुद्धं रजनीचूर्णसंयुतम् ॥
कुमारीद्रवसंयुक्तं मर्दयित्वा धयेद्बुधः ।
तत्सूतश्च पुनस्सम्यक् त्रिफलाचित्रकेन च ॥
तत्सूतश्च पुनस्सम्यक् कटुत्रयसमन्वितम् ।
कुमारीद्रवसंयुक्तं सप्तधा मर्दयेत्पुनः ॥
सप्तवारं ततस्सूतं कुर्यान्मर्दनपातनम् ॥
सर्वदोषविनिर्मुक्तो देहलोहे च वेदयेत् ॥

No. **13107.** औषधयोगग्रन्थः, आन्ध्रटीकासहितः.

AUṢADHAYŌGAGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 17⅜ × 1¼ inches. Pages, 88. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

Similar to the above with meaning in Telugu.

Beginning:

हिङ्गुलं टङ्कणं व्योषं जाजीपत्रलवङ्गकम् ।
कुटजस्य च बीजानि इक्षुरस्यं तथैव च ॥
शुक्लकन्दामोचरसं धातकीकुसुमानि च ।
समभागानि सर्वाणि शुद्धफेन च तत्समम् ॥

* * *

विषूची आमजीर्णे च गुल्मक्षयहरं परम् ।
ग्रहिणीवज्रकवाटोऽयमग्निदीप्तिकरं परम् ॥

End:

शूलिनीरससंयुक्तं ससीतं सैन्धवान्वितम् ।
विष्ठिकालेपनं कृत्वा निगलेन तु बन्धयेत् ॥

No. **13108.** औषधयोगग्रन्थः.

AUṢADHAYŌGAGRANTHAḤ.

Substance, palm-leaf. Size, 8¾ × 1 inches. Pages, 120. Lines, 4 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Ratnākāragrantha 61*a*.

Incomplete.

Same work as the above.

No. **13109.** औषधयोगग्रन्थः, आन्ध्रटीकासहितः.

AUṢADHAYŌGAGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 232. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Wants the beginning and the end.

Similar to the above.

Beginning:

शूलदावानलम्—
रामठटङ्कणसैन्धवविश्वं भागक्रमसमभागानिरूढम् ।
खल्वमध्यदिवसद्वयमात्रं तीक्ष्णमूलरसमर्दनमर्द्यम् ॥

गुञ्जामात्रं ये घुटिकाप्रमाणं गोघृतमेव अनुपानविशेषम् ।
शूलद्वानलनाम प्रसिद्धं रोगसर्वभयदर्पसुवर्णम् ॥

प्रतापलङ्केश्वरम्—

. . . . . वार्धिकुम्भिकलैकभागक्रमशोभिमिन्द्रैः ।
सूताभ्रगन्धोषणलोहशङ्खैर्वनोत्पलाभस्म विषं सुपिष्टम् ॥
प्रसूतिचापानलदन्तबद्धमार्द्राम्बुनाघोरससन्निपाते ।
निजानुपानानिजमध्यसेवा सर्वातिसारे ग्रहिणीविकारे ॥
प्रतापलङ्केश्वरनामधेयो रसप्रयुक्तो गिरिराजपुत्रि ।

End:

शुक्रवृद्धिकरं चैव वन्ध्या च लभते सुतम् ॥
वन्ध्यनष्टं वीर्यनष्टं पुष्पनष्टमसृग्दरम् ।
रक्तपित्तश्चाम्लपित्तमस्थिन्यावहलीमकम् ॥
. . . . . भवति प्रियदर्शनम् ।
वीर्यवृद्धिकरं चैव नारीणां रमते शतम् ॥
पञ्चबाणरसो नाम पूज्यपादेन निर्मितम् ॥

No. **13110**. औषधयोगग्रन्थः, आन्ध्रटीकासहितः.

AUṢADHAYŌGAGRANTHAḤ WITH TELUGU MEANING.

Substance, paper. Size, 9⅞ × 6½ inches. Pages, 107. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 241*a*. The other works herein are Mādhavanidāna 1*a*, Cikitsāgrantha (with Telugu meaning) 26*b*, Vaidyacintāmaṇi 169*a*, Navanāthasiddhapradīpikā (Telugu) 220*a*.

Incomplete.

On the preparation of medicines with a statement of the ailments of different kinds cured by the use of such medicines.

Beginning:

पुष्पधन्वादिरसम्—

रसभुजगसलोहं चाभ्रकं च त्रिभागं कनकविजययष्टिश्शाल्मली नागवल्ली ।
घृतमधुसितदुग्धं पुष्पधन्वादिवल्ली बहयति . . . कान्तिमान् वीर्यमाच्य ॥

* * * *

कनकसुन्दररसम्—

हिङ्गुलं मरिचं गन्धं पिप्पलीटङ्कणं विषम् ।

* * * *

भक्षयेद्ग्रहिणीं हन्ति रसः कनकसुन्दरः ॥
अग्निमान्द्यं ज्वरं तीव्रमतिसारं च नाशयेत् ।

End:

सूचिकाभरणम्—

ह्रियावलीगन्धसूतं वत्सनाभं समांशकम् ।
टङ्कणं गन्धकार्धं च भृङ्गस्वरसमर्दितम् ॥
नेपालतैलमेतेषां समं विन्यस्य पेषयेत् ।
जिह्वया विन्यसेत्सूच्या सूचिकाभरणाह्वयम् ॥
सन्निपातधनुर्वातडोलासम्पुटबन्धनम् ।
शाखाहोमं च सर्वाङ्गमूर्ध्वश्वासं च नाशयेत् ॥

No. **13111**. औषधयोगग्रन्थः, आन्ध्रटीकासहितः.

AUṢADHAYŌGAGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 11 × 1¼ inches. Pages, 130. Lines, 8 on a page. Character, Telugu. Condition, very much injured. Appearance, old.

Wants the beginning. Incomplete.

Similar to the above. The last leaf gives the characteristic symptoms of certain diseases.

Beginning:

ह्रिदलं गन्धकं शुद्धं घातयित्वा विनिक्षिपेत् ।
पारदं दलमानेन मृतशुल्बायसी पुनः ॥
तालमानेन संमिश्रं . . . . ।
. . . . यसपात्रके ।
चुल्ल्यां निवेश्य यत्नेन चालयेन्मृदुवह्निना ।
पात्रमात्रं हि जम्बीररसं तत्र प्रजारयेत् ॥

* * * *

गुल्मप्लीहमहोदरापहरणः क्रव्यादिनामा रसः ॥

End:

मुखे कान्तिस्तथाहीनं नेत्रभग्नाथवाक्कृशः ।
नाभिहृन्नासिकापादौ पाणिशैत्यं हिमांशुवत् ॥
ऊर्ध्वश्वासं धनुर्वातं हिक्का सर्वाङ्गकम्पनम् ।
शिरःकम्प(मप)स्मारं कफकण्ठ . . . ॥

गन्धं स्वादु न जानाति मलं कपिलवर्णकम् ।
शिथिलं चपलं चैव नाडी कुटिलसूक्ष्मकः ॥
आदिपित्तगतिर्नाडी ततो वातगतिर्भवेत् ।

No. 13112. काश्यपीयरोगनिदानम्.

KĀŚYAPĪYARŌGANIDĀNAM.

Substance, paper. Size, 9 × 7 inches. Pages, 40. Lines, 27 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 189*a*. The other works herein are Bhāgavatamu (tenth Skandha) 1*a* (Telugu), Karaṇisaṅkalanapadakamu 17*a*, Pañcāṅgamu 177*a*, Kokkōkamu 209*a*.

Incomplete.

Gives the varieties and the distinguishing characteristics of different maladies, the method of diagnosing them and also the remedial medicines. The work is attributed to Kāśyapa.

Beginning:

विंशतिश्लेष्मनिदानम्—

पित्तरक्तं च शीतं च श्वेतग्रन्थि च श्लेष्मकम् ।
. . . . श्लेष्मं दुर्गन्धं जिह्वमूलकम ॥
कासश्लेष्मं पार्श्वशीघ्रम् उद्गारं श्लैष्मिकं विधा ।
दीर्घश्लेष्मं सान्द्रश्लेष्मं तन्तुश्लेष्मं च पूर्वकम् ॥

* * * *

पित्तश्लेष्मनिदानम्—

पित्तवर्णं श्लेष्मरूपं . . . . . ग्रन्थिरूपकम् ।
हृद्गलं कण्ठशूलं च पित्तश्लेष्मस्य लक्षणम् ॥

* * * *

Colophon:

इति विंशतिश्लेष्मनिदानं संपूर्णम् ।

End:

शङ्खद्रावं शिवक्काथं सर्वरोगेषु योजयेत् ।
कुष्टमष्टादशं चैव लेपमात्रेण नश्यति ।
दुष्टव्रणानि गीर्वाणि . . . मात्राभिशास्यते ॥
शुवानिविविधानं च(?) अनुपानविशेषणम् ।
सर्वरोगविनिर्मुक्तः काश्यपमृषिभाषितम् ॥

No. 13113. कैलासकारकम्.

KAILĀSAKĀRAKAM.

Pages, 82. Lines, 12 on a page.

Begins on fol. 141*a* of the MS. described under No. 13094.

Complete.

On the purification of mercury and on the method of using it in medicinal preparations. In the beginning the legendary account of the origin of mercury is given. The work is in the form of a conversation between Śiva and Pārvatī.

Beginning:

रसाकाराय शर्वाय नमस्सर्वार्थकारिणे ।
जरामरणदारिद्र्यव्याधिदुःखापहारिणे ॥
कैलासशिखरासीनं कान(म)कन्दर्पनाशनम् ।
प्रसन्नं परमेशानं जगदानन्दकारणम् ॥
प्रणम्य परया भक्त्या पार्वती स्तुतिमातनोत् ।

श्रीदेव्युवाच—

देवदेव महादेव जन्मदारिद्र्यनाशन ।
प्रसिद्ध करुणामूर्ते प्रसन्नं परमेश्वर ॥
दिव्यागमसहस्राणि मूलकोशादिकानि च ।
ज्ञातं तव प्रसादेन मया मङ्गलविग्रह ॥
श्रोतुमिच्छामि सर्वेश ततो दिव्यरसायनम् ।
जराजन्मामयघ्नं च खेचरत्वादिसिद्धिदम् ॥
दारिद्र्यदुःखशमनं ब्रह्मत्वादिसुखप्रदम् ।

ईश्वर उवाच—

साधु साधु महाभागे सर्वलोकोपकारिणम् ।
तत्सर्वं जायते सूता(ता)त् शुद्धात्तत्प्राणवल्लभे ॥
सर्वलोकोपकारोत्थं गुह्याद्गुह्यतमं हितम् ।
रसेन्द्रस्य समुत्पत्तिं लक्षणञ्च सुरार्चिते ॥
तत्सर्वं सम्प्रवक्ष्यामि शृणु पार्वति सम्प्रति ।
सुरेन्द्रैर्मुनिभिर्दिव्यैः गन्धर्वोरगकिन्नरैः ॥
प्रार्थितोऽहं भवत्यान्तु कुमारोत्पत्तिमीप्सुभिः ।
तारकासुरनाशाय लोकानां रक्षणाय च ॥

तदा हिमालयगिरेर्गुहायां सुचिरं प्रिये ।
सङ्क्रीडमानयोः कालं गतं नौ पुत्रलिप्सया ॥

* * * *

तेन दन्दह्यमानोऽग्निर्गङ्गायां च मुमोच तत् ।
तेन गङ्गापि सन्तप्ता तद्बहिर्विससर्ज वै ॥
तद्द्विधाभूद्बहिः प्राप्य चैतं स्कन्दं प्रसूयते ।
अन्यच्छुद्धरसो जातो ह्यपतद्बहुभारतः ॥
शतयोजननिम्नेषु पञ्चकूटेषु संस्थिताः ।
तन्मलाद्धातवो जाता मणयो दिव्यवस्तु च ॥
तत्तत्क्षेत्रविशेषेण नामवर्णादिकान् गुणान् ।
भिन्नान् प्राप्तो रसेन्द्रोऽयं जन्मदारिद्र्यभञ्जनः ॥
तानि कूपानि मे पञ्च सद्योजातादिशा(का)नि वै ।

* * * *

सर्वसिद्धिप्रदो देवि देहलोहादिसिद्धिदः ॥
उत्तरस्यां रसो रक्तः सर्वदोषविवर्जितः ।
रसायनन्तु तेनैव देवि जन्मजरोय्यतम् (?) ॥
मध्ये तु मिश्रको ज्ञेयः सर्ववर्णसमन्वितः ।
जटाचन्द्रकसंज्ञो यो दोषादोषसमन्वितः ॥
स चाष्टादशसंस्कारैश्शुद्धसिद्धिप्रदो भवेत् ।
अमरं रसकूपन्तु रसेन्द्रान्धुं महेश्वरि ॥

End:

पञ्चधैव कषायेण पूर्वपूर्वबलप्रदाः ।

* * * *

आलम्ब्य दधिकालौ च योज्यं तद्दर्शिकल्पनात् ।

Colophon:

इति कैलासकारकः समाप्तः ॥

No. 13114. गदासंजीवनी.
GADĀSAÑJĪVANĪ.

Pages, 20. Lines, 21 on a page.

Begins on fol. 166*a* of the MS. described under No. 1800. Incomplete.

On the diagnosis and treatment of maladies: by Mādhavapaṇḍita of Śrīvatsagōtra and Āpastambasūtra. In the beginning he explains in two stanzas the subject-matter of the work which is said to consist of eight topics.

Deals with the following subjects:—

१. सर्वरोगनिदान, २. चिकित्सासारनाडीनिदान, ३. दोषत्रयप्रकरण.

Beginning:

श्रीनाथं पार्वतीनाथं वाणीनाथं सरस्वती(म्) ।
दुर्गावटुकए(हे)रम्बान् नमस्ते (समस्तान्) सन्नमाम्यहम् ॥

उद्रेककालः.

आषाढे श्रावणे पौष्ये माघे भाद्रपदे ध्रुवम् ।
मार्गशीर्षेति कालं च वातरोगं प्रकोपयेत् ॥

* * * *

श्रीकल्याणगुणाधार श्रीपते पुण्यमूर्तये ।
वन्दे चिकित्सारचितं गदासंजीवनं तदा ॥
आदौ रोगनिदानं च द्वितीयोग्रप्रसातथाः (?) ।
तृतीयौषधकल्पं च वक्ष्यते तु महारसः ।
चतुर्थं मूलिकाकल्पं पञ्चमं रक्तमोक्षणम् ॥
अथाग्निरक्षाकर्माणि षट्भेदेन चिकित्सितम् ।
सप्तमं शस्त्रकर्माणि मन्त्रमष्टविधं भवेत् ॥

* * * *

Colophon:

इति श्रीमद्विख्यातचरित्रकापस्तम्बपवित्रकवितावैद्यविद्यात्रिनेत्रमाधवपण्डितविरचिते गदासंजीवनी नाम सर्वरोगनिदानं व्याख्यास्यामः ॥

पञ्चभूतात्मको देहस्त्रिदोषस्सप्तधातुकः ।
त्रिगुणानेकविख्यातिरसे कमलसञ्चयः ॥

See under the next number for the end.

No. 13115. गदासंजीवनम्, आन्ध्रटीकासहितम्.
GADĀSAÑJĪVANAM WITH TELUGU MEANING.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 74. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Cikitsāgrantha (with Telugu meaning) 38*a* and 110*a*, Āyurvēda 58*a*, Nidānamuktāvalī 64*a*, Nidānagrantha (with Telugu meaning) 73*a*, Vastuguṇakalpavallī (with Telugu meaning) 103*a*, Vaidyacintāmaṇi (with Telugu meaning) 171*a*.

Wants the beginning in the Dōṣatrayaprakaraṇa ; incomplete.

Deals with the following subjects :—

१. अशीतिवातनिदान.
२. पैत्त्यरोगप्रशंसा.
३. श्लेष्मरोगप्रशंसन.
४. रोगज्वरनिदान.
५. क्षयरोगनिदान.
६. ग्रहिणीनिदान.
७. मेहनिदान.
८. विषूच्यजीर्णनिदान.

Same work as the above and with Telugu meaning. For the beginning see under the work described under the previous number.

Name of the copyist—Mājēṭi Sarvēśaliṅga. Date of transcription—Wednesday, the 7th day of the bright fortnight of the Cittirai month.

End :

अथ विषूच्यजीर्णनिदानं व्याख्यास्यामः—

यथा आरं बलवता यथा वातोल्बणानि च ।
यथा व्यापारशैत्योक्तं तथा रोगः प्रजायते ॥
भोजनातिशयं गुर्वी तस्याजीर्णं चतुर्विधम् ।
रसशेषेण विस्पष्टं विधूमे धूमनामतः ॥
जीर्णशेषं छर्दिशेषं रसशेषाभिधानकम् ।
सर्वे नाजीर्णनामाहं विस्पुष्टेन प्रकीर्तितः ॥
आम्लोद्गारे च धूमे च विधूमे कर्णनेत्रयोः ।
कण्ठनाभी आदिमध्यं तावुद्गारविजृम्भणम् ॥
एवं चतुर्विधमिदं तस्याजीर्णोग्ररोगजः ।
विस्फुष्टस्य च विख्याता विशेषान्मरणं सुखम् ॥

* * * *

मृत्युरोगं च विख्याता सद्योमृत्युविषूचिका ॥

* * * *

Colophon :

इति श्रीवत्सगोत्रपवित्रापस्तम्बसूत्रकवितावैद्यविद्यात्रिनेत्रमाधवपण्डितविर-चिते गदासंजीवनीनामग्रन्थान्तरे विषूचिनिदानमजीर्णनिदानसक्षेपेस्समाप्तः ॥

No. 13116. गदासंजीवनी, आन्ध्रटीकासहिता.

GADĀSAÑJĪVANĪ WITH TELUGU MEANING.

Pages, 57. Lines, 24 on a page.

Begins on fol. 7*a* of the MS. described under No. 13086.

Incomplete.

Contains the following topics :—

१. सर्वरोगनिदान.
२. नाडीनिदान.
३. दोषत्रयप्रकरण.
४. अशीतिवातनिदान.
५. पैत्त्यरोगनिदान.
६. श्लेष्मरोगनिदान.
७. रोगज्वरनिदान.
८. क्षयरोगनिदान.
९. ग्रहिणीनिदान.
१०. मेहनिदान.
११. विषूच्यजीर्णनिदान.

Same work as the above.

Copied on Wednesday, the 8th day of the bright fortnight of the Puṣya month in the year Pramōdūta.

No. 13117. गदासंजीवनी, आन्ध्रटीकासहिता.

GADĀSAÑJĪVANĪ WITH TELUGU MEANING.

Substance, paper. Size, 10 × $7\frac{5}{8}$ inches. Pages, 15. Lines, 28 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 152*a*. The other works herein are Dravyaratnāvali 1*a*, Auṣadhayōgādikamu (Telugu) 69*a*, Piṇḍōtpattilakṣaṇa (with Telugu commentary) 92*a*, Dēhatattvanirṇaya (with Telugu meaning) 103*b*, Nāḍīparīkṣā (with Telugu meaning) 109*a*, Nāḍīvijñāna (with Telugu meaning) 114*a*, Vaidyacintāmaṇi (with Telugu meaning) 120*a*, Vaidyaviṣayālu 160*a*, Trailōkyacintāmaṇi (with Telugu meaning) 167*a*.

Incomplete.

Same work as the above.

No. 13118. चिकित्साग्रन्थः, कर्णाटकटीकासहितः.

CIKITSĀGRANTHAḤ WITH KANARESE MEANING.

Pages, 277. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 11955.

A treatise dealing with the treatment of the different kinds of diseases by means of appropriate medicines, the preparation of which is also indicated. It is accompanied by meaning in Kanarese.

Beginning:

तन्द्रा मूर्च्छा भ्रमो दाहः प्रलापो हृदि वेदना ।
अपथ्यजनिता दोषा ज्ञेया वैद्यविशारदैः ॥

* * * *

चिकित्सा—

शार्ङ्गौष्णाम्बुदभूनिम्बकटुको नागरोषणैः ।
कृत्वा क्वाथं पिबेत् सद्यः अपथ्याद्भुतदोषनुत् ॥

* * * *

प्रतापलङ्केश्वररसः—

एकेन चन्द्रानलवार्धिकुम्भिकलाष्टभागः क्रमशो नियुञ्ज्यात् ।
सूताभ्रगन्धोषणलोहशङ्खवन्योत्पलाभस्म विषं क्रमेण ॥
व्योषाम्बुनामर्द्य दिनत्रयं तत् गुञ्जाद्वयं चार्द्रकवारिणा हि ।
दद्यादिदं जीरकशर्कराभ्याामपथ्यदोषेऽपि च सूतिकोत्थे ॥

End:

ओष्ठरोगचिकित्सा—

तत्रोष्ठयोर्गदो ज्ञेयो नवदै(धै)व त्रिभिर्मितैः ।
सन्निपातेन रक्तेन मांसेनापि च मेदसा ।
क्षतेनागन्तुकैश्चेति तत्र वातेन कर्कशौ ॥
परुषात् पुटितौ स्यातां पीत्वा निशौ विदाहिनौ ।
पिटकाभिरशीतौ च श्लेष्मणा पिच्छिलौ गुरू ॥
कण्डूयुतौ भवेतां च सन्निपातेन दूषितौ ।
सर्वाकृति तु रक्तेन रक्तच्छायौ सृतासृजे ॥

* * * *

. . . . . मांसलौ स्थूलौ मांसपिण्डिवदुच्छिदौ ।

No. **13119.** चिकित्साग्रन्थः, कर्णाटकटीकासहितः.

CIKITSĀGRANTHAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{5}{8}$ inches. Pages, 182. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains up to the Aśmarīrōgacikitsā.

Same work as the above.

No. **13120.** चिकित्साग्रन्थः, आन्ध्रटीकासहितः.

CIKITSĀGRANTHAḤ WITH TELUGU MEANING.

Pages, 38. Lines, 5 on a page.

Begins on fol. 38*a* of the MS. described under No. 13115.

Similar to the above, but with meaning in Telugu.

Beginning:

आगामधूमं महिषाक्षियुक्तं निवाजिगन्धाक्(त)तण्डुलीयम् ।
गोमूत्रपिष्टं युगपन्निहन्ति विषाणि शा(च) स्थावरजङ्गमानि ॥
अलाबुबीजं सकरञ्जबीजं कोशातकीमूलकबीजतुल्यम् ।
गव्येन मूत्रेण च सेव्य दद्ये(द्या)त् विषस्य नाशानि महोरगेन्द्रे ॥

End:

मधुना सहितं सम्यक् खादयेद्दिवसान्तकम् ।
माहिषं गव्यमथवा पानकं वाथ पाययेत् ॥
स्तम्भनं मोहनं पुष्पं सर्वषण्डत्वनाशनम् ।
[रमयेद] (ऋ)तुकाले तु नारीणामादौ भवति सोदरि ॥
नाभोदरप्रदेशे तु ग्रन्थिर्भवति वेदना ।
सन्तापो योनिशूलं च कदाचिद्रक्तमोक्षकम् ।
कदाचित् बहुमूत्रं तु त्रिभिर्लक्षणसंयुतम् ॥

No. **13121.** चिकित्साग्रन्थः, आन्ध्रटीकासहितः.

CIKITSĀGRANTHAḤ WITH TELUGU MEANING.

Pages, 124. Lines, 5 on a page.

Begins on fol. 110*a* of the MS. described under No. 13115.

Foll. 110—114 and 146—170 contain the Cikitsābhāga in Telugu language.

Similar to the work described above.

Beginning:

. . . . . जाजी अजामूत्रेण पेषयेत् ।
. . . . . . निशान्धतिमिराननम् ॥
. . . . . . पुष्पलानि पटलानि च ।
अतिरिक्तानि मांसानि नवरात्रं विनश्यति ॥

* * * *

आज्येषु पुष्पं मधुनाश्रपेतं शृङ्गेण कन्दं तिमिरेषु तैलम् ।
रात्रे च कासारजनीशरोमा (?) पुनर्नवा नेत्ररुजां दुहन्ति ॥

End:

दोषज्वरकषायम्—

वारुण्यो वह्निशाण्डिल्यकुण्डलीसिन्धुतारकम् ।
द्विस्थेरनागसंयुक्तं काथं दोषज्वरापहम् ॥
एवालुकुण्डलीव्याघ्रश्रीपर्णी हंसपादिका ।
रविमूलं वचाशुण्ठीकाथं दोषविनाशनम् ॥

No. 13122. चिकित्साग्रन्थः, आन्ध्रटीकासहितः.

CIKITSĀGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 116. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 48*a*. The other works herein are Āyurvēda 1*a*, Nidānamuktāvali 7*a*, Nidānagrantha (with Telugu meaning) 10*a*, Vastugunakalpavallī (with Telugu meaning) 41*a*, Vaidyacintāmaṇi (with Telugu meaning) 106*a*.

Foll. 48*a*—52*a* contain some Cikitsās in Telugu.

Incomplete.

Same work as the above.

No. 13123. चिकित्साग्रन्थः, आन्ध्रटीकासहितः.

CIKITSĀGRANTHAḤ WITH TELUGU MEANING.

Pages, 58. Lines, 24 on a page.

Begins on fol. 38*a* of the MS. described under No. 13086.

Incomplete.

Similar to the above. At the end 20 pages of matter are found in Telugu dealing with the subject of medicine.

Beginning:

लशुनं दीप्यकं शिग्रु कृष्ण .रकनागरम् ।
दीप्यकं हिङ्गुसंयुक्तं काथोऽयं सर्वशूलजित् ॥
सूरणं लशुनं शिग्रु ग्रन्थिकं चित्रकं वचा ।
पाठाशुण्ठ्यामलकाथं सर्वशूलनिवारणम् ॥

End:

हिङ्गुसौवर्चलं पाठा सर्षपाविश्वमेव च ।
आमशूलहरं देयं भक्तिहिङ्ग्वादिपञ्चकम् ॥
* * *
अष्टोदराणि हन्त्येनं जलकूर्मं तथैव च ॥

No. 13124. चिकित्साग्रन्थः, आन्ध्रटीकासहितः.

CIKITSĀGRANTHAḤ WITH TELUGU MEANING.

Substance, paper. Size, 11⅜ × 8¼ inches. Pages, 140. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 144*b*. The other works herein are Hariścandracarita (Dvipada) 1*a*, Cikitsāsārasaṅgraha 126*a*, Dūtādhyāya 142*a*, Madanakāmaratna 216*a*, Vēmanapadyālu 274*b*, Vēṅkaṭaramaṇaśataka 332*a*.

Foll. 144*b*—148*b* and 207—215 contain wholly Telugu passages relating to medicine.

Similar to the work described above.

Beginning:

षोडशं बिल्वमज्जानि माषचूर्णं तदर्धकम् ।
चत्वारि निम्बबीजानि लशुनं तु पलद्वयम् ॥
हिङ्गुनागरमेकैकपलं तु गुडगुग्गुलम् ।
अजाक्षीरेण संमिश्रमजाचर्मेण वेष्टितम् ॥
मासमेकं धान्यपुटं साक्षा इङ्गुबली अपि ।

End:

अशीतिर्वातजान् रोगान् हन्ति शूलशतत्रयम् ।
विंशतिश्लेष्मरोगेण चतुर्विंशतिपैत्त्यकम् ॥
तत्तद्रोगानुपानेन निहन्ति सकलामयान् ।
क्षयमेकादशं चैव ग्रहिणीपाण्डुकामिलाम् ॥
कुम्भकामिलकारोगानुदावर्तमहोदरम् ।
दीपनं परमं प्रोक्तं सर्वरोगहरं परम् ॥
बालानां परमं पथ्यं दुष्टमायुष्यमुत्तमम् ।
बाहुमात्रकेमुक्तेन सर्वरोगहरं परम् ॥
बालसूर्यसमं तेजो बालसूर्योदयो रसः ।

No. 13125. चिकित्साग्रन्थः, आन्ध्रटीकासहितः.

CIKITSĀGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 14⅝ × 1¼ inches. Pages, 30. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 19*a*. The other work herein is Rasapradīpikā 1*a*, (Telugu).

Similar to the above.

Beginning:

विषटङ्कणनेपालं भागवृद्धिसमाङुलम् ।
रसप्रतापमार्ताण्डं रसज्वरनिवारणम् ॥

* * * *

विषताम्रं बलिं चैव गौरीपाषाणकं समम् ।
नाभिसूतं द्वयं भागं निर्गुण्डीतुलसीरसम् ॥

* * * *

एला जाजिफला शुण्ठी पिप्पलीपस्तुबीजकम् ।
लवङ्गं जाजिपत्रं च अन्धेन विजया तिला ॥
यवानीम्लेच्छपैशाचा एतत्सर्वं समं(भवेत्) ।
सर्वं द्विगुणभल्लातफलचूर्णं तु कारयेत् ॥
भक्षयेन्निष्कमात्रेण बहुमूत्रयुवा(रुजा)पहम् ।

End:

शिरश्च म(प)लितं केशं तेन तैलं प्रभावति ।
भृङ्गामलकतैलेन आश्विनेयप्रकल्पितम् ॥

No. **13126.** चिकित्साग्रन्थः, आन्ध्रटीकासहितः.

CIKITSĀGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 92. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 98*a*. The other works herein are Cikitsāsārasaṅgraha (with Telugu meaning) 1*a*, Dattātrēyamata 145*a*, Vaidyanighaṇṭu 173*a*, Cikitsāsārasaṅgraha 247*a* (different).

Incomplete.

Similar to the above.

Beginning:

पिप्पल्यादिचूर्णम्—

पिप्पली नागरं पाठा शारिबा बृहतीद्वयम् ।
चित्रकं कुटजं बीजं क्षारो लवणपञ्चकम् ॥
पूर्णीकृतं दधिसुरातन्मन्दोष्णाम्बुकाञ्जिकैः ।
पिबेदग्निनिवृत्त्यर्थं कोष्ठवातहरं परम् ॥

End:

स्वापद्दिवामधुरशीतलमत्स्यमांसैः गुर्वम्लपिच्छिलतरक्षुपयानुकालैः (?) ।
शिम्बादितित्तिरिलवणोदकपानभक्षैः श्लेष्मप्रकोपमुपयाति घनाघनेषु ॥

* * * *

हिमशिशिरवसन्ते ग्रीष्मवर्षाशरत्तौ स्तन . . वनवनाम्भोहर्म्यगोक्षीरपानैः ।
सुखमनुभव राजन् त्वद्विषो यान्तु नाशं दिवसकमललज्जाशर्वरीरेणुपङ्कैः ॥

No. **13127.** चिकित्साग्रन्थः, आन्ध्रटीकासहितः.

CIKITSĀGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 272. Lines, 5 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 92*a*. The other works herein are Rasaratnākara 1*a* (with Telugu meaning), Rasadīpikā 23*a* (Telugu).

Similar to the above.

Beginning:

स्वस्थास्वस्थमनुष्येषु सम्यङ्नाडी निरीक्ष्यते ।
तत्र पञ्चविधैर्भेदैर्वर्तते युगपद्धृशम् ॥
करे नाभ्योरुकण्ठेषु नासिकायां तथैव च ॥
स्वस्थास्वस्थेषु वहति विक्रिया चेद्विपर्ययः ॥

* * * *

विरेकसाध्यगुल्मार्शोशोफपाण्डुमहोदरः ।
कामिलामेहकृच्छ्रघ्नं नेत्ररोगं ज्वरापहम् ॥
आध्मानं शूलरोगं च कुष्ठपैत्त्यनिवारणम् ।

विरेचनवर्जम्—

क्षयातिसारग्रहिणी अजीर्णतरुणज्वरम् ।
समीरणः श्वासकारी बालवृद्धस्य शोषणः ॥
विरेचनं न कर्तव्यं भिषक्शास्त्र(वि)निश्चयम् ।

End:

बालज्वरेषु सर्वेषु लेपयेद्भिषगुत्तमः ।
उष्णाम्बुना . . शुण्ठी वरालकटुदीपकम् ॥
स्तन्येन . . . . वराङ्गानां पिबेत् बालाद्यजीर्णके ।
नागरातिविषाहिङ्गुचित्रमूलं वचाभया ॥
चूर्णमुष्णं . . . . अजीर्णार्तिः पिबेच्छिशुः ।

No. **13128.** चिकित्साग्रन्थः, आन्ध्रटीकासहितः.

CIKITSĀGRANTHAḤ WITH TELUGU MEANING.

Pages, 285. Lines, 22 on a page.

Begins on fol. 26*b* of the MS. described under No. 13110.

Wants the beginning and the end.

Gives the preparation of medicines together with the diseases cured by them.

This MS. is said to have been copied from the MS. of Mājēṭi Sarvēśaliṅga on Monday, the 13th day of the dark fortnight of the Māgha month in the year Yuva.

Beginning :

धात्री विलङ्गं त्रिषु गन्धमुस्ताव्योषं च पथ्या त्रिवृता त्रिभागम् ।
चूर्णं समं शर्करया समेतमुष्णोदकेन पिबते नराणाम् ॥
शूलाग्निमान्द्यग्रहिणीविकारं वातं च पित्तं च क्रिमिं च हन्ति ॥
मेहं च मेधश्रगलं(?) च पाण्डुं हृद्रोगनाशं हयपतिचूर्णम् ॥

End :

प्रत्येकं प्रस्थमात्रं तु घृतं प्रस्थं विनिक्षिपेत् ।
अथायं सर्वमेकत्र लेह्यं वराधु(साधु) साधयेत् ॥

* * *

योगोऽयं पुष्पराजाख्यमस्मभ्यं निर्मितं पुरः ।

* * * *

हृत्कामिलारोगमरोचकं च हंस्या(न्त्या)न्लवृद्धिं च करोति वह्निः ।

No. **13129.** चिकित्साग्रन्थः, आन्ध्रटीकासहितः.

CIKITSĀGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 16¾ × 1¼ inches. Pages, 184. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 127*a*. The other works herein are Vaidyayōgasaṅgrahamu 1*a*, Vaidyacintāmaṇi (with Telugu meaning) 5*a*, Vaidyayōgasaṅgraha (with Telugu meaning) 52*a*, Vētālakavaca 125*a*, Vṛṣabharājīya (with Telugu meaning) 219*a*, Auṣadhayōgamu 243*a*.

Incomplete.

Similar to the above.

Beginning :

द्विपलं पिप्पलीचूर्णं मिश्रसर्वेश्वरो रसः ।
द्विगुञ्जं लेहयेत् क्षौद्रैः सप्तमण्डलकुष्ठनुत् ॥
वाकुची देवदारुं च कर्षमात्रं समार्थितम् ।
लिहेदेरण्डतैलेन अनुपानं शुभावहम् ॥

* * *

आयुर्वेदे—

वाकुच्यास्थललेपेन तैलैर्वा राजवृक्षकैः ।
पुत्रजीवोत्थतैलैश्च लेपे पाम विनाशयेत् ॥

* * * *

ग्रन्थान्तरे—

शुद्धसूतं मृतं चाभ्रगन्धकं मर्दयेत्समम् ।
दिनं निर्गुण्डिकाद्रावैरुद्दाहो भूधरे पचेत् ॥

End :

कदलीक्षुरसेनैव शुक्रवृद्धिः प्रजायते ।
कासमुद्रकषायेण क्षयकासो विनश्यति ॥
शिलाक्षारोदकेनैव आम्लपित्तविनाशनम् ।
तिलपिष्टेन संमर्द्य क्वाथं मूत्रनिवारणम् ॥
गुळूचिकन्दनिर्यासं गण्डमा(ला)दिकं जयेत् ।
एतान्यतिबलान् पुंसां कान्तिपुष्टिविवर्धनम् ॥
आयुःप्रवर्धनं चैव वलीपलितनाशनम् ।
सन्तताभ्यासयोगेन जीवेद्वर्षशतं नरः ॥
मधुराहारभोजी च सर्वसिद्धिकरं परम् ।

No. **13130.** चिकित्साग्रन्थसारः, आन्ध्रटीकासहितः.

CIKITSĀGRANTHASĀRAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 15⅞ × 1¼ inches. Pages, 27. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Santānakalpa 15*a* (with Telugu meaning), Cikitsāviṣaya 25*a*

On the treatment of maladies of different kinds.

Beginning :

रक्तपित्तचिकित्सा—

अष्टद्रव्याम्ललवणं कषायक्षारवस्तुभिः ।
यकृत्प्लीहाश्रितं रक्तमूर्ध्वं चाधः प्रवर्तते ॥

* * * *

वातात् श्यामारुणं रूक्षं शोणितं तनु फेनिलम् ।
कफतः स्निग्धमापाण्डु पिप्पलं बहुलं बहु ॥

* * * *

रसावाखरमञ्जर्या वाशाया वाशितोत्कटः ।
निवारयेद्रक्तपित्तं मदागं वाति मूर्ध्व(र्ध)गम् ॥

End :

पुलकं श्वासकासं च बाह्यावातमिदं क्रमात् ।

चिकित्सा—

कषायं पञ्चकोलेन लिप्यते मधुसंयुतम् ।

No. 13131. चिकित्साविषयः.

CIKITSĀVIṢAYAḤ.

Substance, palm-leaf. Size, $11\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 141. Lines, 4 on a page. Character, Grantha and Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Nītiśāstrasamuccaya (with Kanarese meaning) 72*a*

Wants the beginning.

Similar to the work described above and with Kanarese meaning.

Beginning:

अङ्गुष्ठमूले पोत्येव(पित्ते च) मध्ये वहति श्लेष्मकम् ।
अन्ते प्रभञ्जनो वायुः त्रिभिस्स्थानमिति क्रमात् ॥
वातनाडी वक्रगतिः भेकलावुकसर्पवत् ।
बालस्य डोला च ततो जलूकस्य गतिर्भवेत् ॥

End:

स्तम्बनं दीपनं वश्यं शुक्लवृद्धिकरं परम् ॥
बलवर्णकरं चैव शु(तु)ष्टिपूले(वे) प्रजायते ।
सर्वरोगहरं पथ्यं पूज्यपादेन भाषितम् ॥

No. 13132. चिकित्साविषयः.

CIKITSĀVIṢAYAḤ.

Substance, palm-leaf. Size, $10\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 42. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Incomplete. Wants two leaves in the beginning.

Similar to the work described above.

Beginning:

. . . . निष्पावमिष्टं बिल्वमुपोढकी ।
हिमाम्बुसूपमांसानि काठिनो . . . . ॥
अश्वाद्यारोहणं स्नानमपथ्यं प्राहुरर्शसाम् ।
पटोलकुटजाजाजी शार्ङ्गेरीकदलीफलम् ॥
अजादाधि च गाङ्गेरी तैलकैडर्यवास्तुकम् ।

निद्राकरश्च शाकश्च कपित्थन्तु परीरसम् ॥
रम्भापुष्पश्च बिल्वश्च ग्रहिणीमतिसारजित् ।

End:

मण्डलाख्यं विचर्च्छी च दैवाडिकिटिभं तथा ।
चर्मदद्रू गले सिद्धाश्शतारुस्स्याद्दशाष्टकम् ।
श्वित्रकास्यो विसर्पि च विंशत्येताः प्रकीर्तिताः ॥
दाहकण्डूकरस्पर्शाश्वेताश्वेतविवर्णता ।
ततो व्रणानां शूल.

No. 13133. चिकित्साविषयः.

CIKITSĀVIṢAYAḤ.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 46. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants the beginning and the end.

Similar to the work described above, but with Telugu meaning.

Beginning:

सन्निपातोद्भवा नाडीविज्ञानीयमिदं बुधैः ।

स्पर्शलक्षणम्—

अथ स्पर्शामयं वक्ष्ये त्वचि उ(चो)ष्णप्रभञ्जनम् ।
अत्युष्णं पित्तरोगस्तु अथवा(ज्ञाना)मतिशीतकम् ॥
क्वचिश्छीतं श्लेष्मरोगी[नि] द्वन्द्वजाश्च पृथक्पृथक् ।

End:

मत्तकातिविषामुस्ता बालबिल्वं च नागरम् ।
व्याधीत धातकी लोध्रापाठामोशीरदीपकम् ॥
मारीचं शाल्मलं नीपं समभागानि चूर्णयेत् ।
गोदध्ना मिश्रितं प्रातः पिबेत्सर्वातिसारजित् ॥
धूमरक्तातिसाराणां ग्रहिणी काशु नाश्नीयात् (!) ।

No. 13134. चिकित्साविषयः, आन्ध्रटीकासहितः.

CIKITSĀVIṢAYAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 13. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 52*b*. The other work herein is Cikitsāsārasaṅgraha 1*a*.

Similar to the above.

Beginning:

शिरोनस्यम्—

एरण्डमूलं तगरं च शुण्ठी जीवन्ति रास्ना नच(व)सैन्धवेन ।
भृङ्गं विलङ्गं मधुकं च कु(को)ष्ठं सनागरं गव्यघृतेन पक्वम् ॥
षड्बिन्दवो नासिकरन्ध्रमूले शिरोगतं रोगेशतं निहन्ति ।

End:

कासश्वासातिसारशमने कायाग्निसन्दीपने
अर्शोऽर्शे ग्रहिणीहरं ज्वरहरं तिक्तार्शतच्छोणितम् ।
आनन्दं (सततं नृणां)मतिकरं कविता बाला विलासीकरं
हन्ते सर्वगुणा निहन्ति मृदुवल्लीगलितं कामेश्वरोऽयं सदा ॥

No. **13135.** चिकित्साविषयः, आन्ध्रटीकासहितः.

CIKITSĀVIṢAYAḤ WITH TELUGU MEANING.

Pages, 160. Lines, 6 on a page.

Begins on fol. 25*a* of the MS. described under No. 13130.

Similar to the above.

Beginning:

आरनालं प्रियङ्गुं च शीतलन्तु न वर्जयेत् ।
उपोदकी समायुक्ते रसपं तैलवर्जितम् ॥
अलाबूवर्तुलं दैवान्नाशयेन्नात्र संशयः ।
* * *
पटूनि त्रिफलाधारं भार्ङ्गीं रास्नामयाशसी ।
कटुत्रयं द्विजीराणां भल्लातं चित्रकं वचा ॥
द्विक्षारं विवृता क्षुद्रा शृङ्गिसर्षपरामठम् ।
* * *
बडवानलनामायं चूर्णोऽयं जठराग्निजित् ॥

End:

अमृतं चैकभागं (च) द्विभागं हिङ्गुलस्य च ।
टङ्कणस्य त्रयो भागाः नेपालं चाष्टभागकम् ॥
एष वज्रायुधो नाम सर्वज्वरनिवारणम् ।
सर्वज्वरहरं ज्ञेयं याममात्रेण शाम्यति ॥

No. **13136.** चिकित्साविषयः, आन्ध्रटीकासहितः.

CIKITSĀVIṢAYAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 12 × 1¼ inches. Pages, 8. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Kumārāñjana 6*a* Cintāmaṇidurgī 10*a*, Vaidya (Kanarese), Prāṇapratiṣṭhā 31*a*, Vaidya (Kanarese) 32*a*, Hanumanmantra 47*a*, Āñjanēyakavaca 53*a*.

Deals with different kinds of fever, their diagnosis and their treatment also.

Beginning:

अथ सप्तविधान् दोषान् वक्ष्यते शास्त्रनिश्चयः ।
तरुणज्वरमध्ये तु अपथ्येन प्रजायते ॥
अतः परं प्रवक्ष्यामि ज्वरसारप्रमाणकम् ।
सप्तरात्रं वातकश्च षड्रात्रं वापि पैत्त्यजे ॥

ज्वरनिदानम्—

ज्वरस्तीक्ष्णोऽथवा शीतमथवाल्पज्वरोऽपि वा ।
नेत्रान्तरक्तरहितं पाणिपादनखे तथा ।
नेत्रे कान्तिविहीने च सागरध्वनिनिश्रवे (?) ॥

End:

ज्वरो गुम्भनहिक्का च मन्दाग्निर्जानुनी व्यथा ।
अम्लस्वभावगन्धं च अजीर्णज्वरलक्षणम् ॥

No. **13137.** चिकित्सासारसङ्ग्रहः.

CIKITSĀSĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 121. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 57*a*. The other works herein are Nighaṇṭurājīya 1*a*, Rasēndracūḍāmaṇi 24*a*, Bhāradvājīya 118*a*.

Contains the first Vilāsa.

A treatise on pathology. The eight different ways of diagnosing diseases are explained in the beginning. In the colophon the author is stated to be Dhanvantari.

The copying of the MS. is said to have been completed on Tuesday, the 2nd day of the dark fortnight of the month of Āṣāḍha in the year Tāraṇa by Mājēṭi Sarvēśaliṅga.

Beginning:

यस्य द्विरदवक्त्राद्याः . . . . . .
. . . . विष्वक्सेनं तमाश्रये ॥
आदौ समस्तरोगेषु अष्टस्थानं परीक्षयेत् ।
नाडीमूत्रमलं जिह्वा शब्दस्पर्श(च)रूपदृक् ॥

नाडीपरीक्षा--

अङ्गुष्ठमूलमाश्रित्य अङ्गुलत्रयपीडनम् ।
आदौ वायुः कफो मध्ये अन्ते पैत्त्यश्च वर्तते
यवस्य बीजमात्रं च नाडी सर्वाङ्गसङ्गतिः ।
नारीणां वामभागे च पुंसां दक्षिणशोधयेत् ॥

End:

फलसर्पिश्च कल्याणघृतमत्र प्रदापयेत् ।
ऊर्ध्वमग्निमथो गर्भे मध्ये तु जलसंग्रहम् ॥
वायुना किं न नीतोऽसौ कथं गर्भे न जीर्यते ।
नाभिप्रदेशे कमलमष्टकोणं तथा भवेत् ॥
तन्मध्ये वीर्यपतनं तत्पुष्पं मुकुलं भवेत् ।
तन्नालमध्ये क्रिमिजं . तच्छुक्लं भक्षितं भवेत् ॥

Colophon:

इति श्रीचिकित्सासारसंग्रहे धन्वन्तरिकृतौ सर्वरोगनिदानं नाम प्रथमविलासः ॥

No. **13138.** चिकित्सासारसङ्ग्रहः, आन्ध्रटीकासहितः.

CIKITSĀSĀRASAṄGRAHAH WITH TELUGU MEANING.

Pages, 193. Lines, 7 on a page.

Begins on fol. 247*a* of the MS. described under No. 13126.

Deals with the treatment of three varieties of maladies, viz., **अजीर्णविषूचिका** (cholera due to indigestion), **प्लीहरोग** (spleen diseases) and **समस्तोदर** (diseases relating to the disorder of the stomach).

Beginning:

उष्णाम्बुक्षारलवणैः कटुभिः पित्तदूषणात् ।
यकृत्प्लिहा(प्लीहा)श्रितं रक्तमूर्ध्वं चाथ प्रवर्तते ॥
ऊर्ध्वे नासास्यकर्णाक्षिरदे मेढ्रे गुदेरपि ।
ऊर्ध्वसाध्यमधोयाप्यमसाध्यमुभयायनम् ॥
* * * *

Colophon:

इति सारसङ्ग्रहे अजीर्णविषूचिकाचिकित्सा समाप्ता ॥

वातारितैलसंयुक्तं त्रिफलागुग्गुलेन च ।
सूतकं गन्धकं चैव ज्वरदारिद्र्यनाशनम् ॥

End:

सशर्करं युवा फेनरक्तान्ददांगोलकृष्णा . . . (?) ।
रसाञ्जनं हितं युक्तं च वेलतालिशतुत्थमधुनाशशुक्रम् (?) ॥

Colophon:

सारसङ्ग्रहः समाप्तः ॥

No. **13139.** चिकित्सासारसङ्ग्रहः, आन्ध्रटीकासहितः.

CIKITSĀSĀRASAṄGRAHAH WITH TELUGU MEANING.

Pages, 102. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13134.

Seems complete.

Similar to the above.

Beginning:

नमामि धन्वन्तरिमादिदेवं सुरासुरैर्वन्दितपादपद्मम् ।
लोके ज्वरारुग्मत(ग्भय)मृत्युनाशनं दातारमीशं विविधौषधीनाम् ॥
धर्मो विवर्धति युधिष्ठिरकीर्तनेन पापं प्रणश्यति वृकोदरकीर्तनेन ।
दुःखं विनश्यति धनञ्जयकीर्तनेन माद्रीसुतौ कथयतो न भवन्ति रोगाः ॥
रसवैद्यं भवेद्दैवं मानुषं मूलिकादिभिः ।
आसुरं शस्त्रवैद्यं च सिद्धवैद्यं च मन्त्रकम् ॥

अमृतहस्तम्—

पताकं कुम्भपातश्च मच्छपादाङ्कुशादिषु (?) ।
रक्तरेकग्रहो हस्तो ग्रासस्थामृतहस्तवान् ॥

दग्धहस्तम्—

तस्य स्त्रीसङ्गलोलः कपटपटुखिनो दुर्जनोऽपानजन्मा
दुर्मार्गैकप्रवृत्तः सततधनपरः पानमत्तः प्रमत्तः ॥

क्षुद्रानिद्राक्षुग(तुष)ङ्गः परधनहरकान् . . . . ॥
तस्य रोगं प्रवक्ष्यन्ति पङ्कवक्षालिते यथा ।
अर्धरात्रेषु मध्याह्ने पर्वयोस्सन्ध्यवासरे ।
मध्यवारे भिषक् सर्वं ज्वरितं नावलोकयेत् ॥
* * * *

Colophon:

इति श्रीचिकित्सासारसङ्ग्रहे व्याधिरूपभेदाधिकारः प्रथमः स्कन्धः ॥
* * * *

इति चिकित्सासारसङ्ग्रहे ज्वररूपज्वरागतनक्षत्रपरिमितादिशान्तिदानतर्पणविधिस्तृतीयोऽध्यायः ॥

End:

जातीफलं दुत्तुमूलं शाल्मल्यपिचवत्सकैः ।
दाडिमं नागरं क्वाथं ज्वरातिसारनाशनम् ॥

Colophon:

इति चिकित्सासारसङ्ग्रहाधिकारः समाप्तः ॥

No. 13140. चिकित्सासारसङ्ग्रहः, आन्ध्रटीकासहितः.

CIKITSĀSĀRASAṄGRAHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 18 × 1¼ inches. Pages, 578. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

Similar to the above.

Beginning:

क्षीराब्धिमथने जातमभयं दक्षिणे करे ।
सव्ये च सुधया पूर्णं बिभ्राणं कलशं शुभम् ॥
नीलाम्बरधरं देवं दिव्याभरणभूषितम् ।
रजतासन आसीनं सर्वैर्द्रव्यैरुपाश्रितम् ॥
धन्वन्तरिरिति ख्यातं चिन्तयेत् सुसमाहितः ।
सम्पूर्णचन्द्रसदृशः पुण्डरीकविलोचनः ॥
आजानुबाहुतद्रूपं कृष्णसर्पविभूषणम् ।
कुण्डलीकुड्मलादन्तिसर्वालङ्कारशोभितम् ॥

शान्तं कृपाजलनिधिमक्रोधः शास्त्रपारगः ।
देवतारक्षकः श्रेष्ठो व्याधिमानविदारणः ॥
औषधं ग्राह्य कुशलः भिषक्छास्त्रविशारदः ।
सर्वज्ञो ज्ञानसम्पन्नः ध्यायेत् धन्वन्तरिं तथा ॥
श्रीरामं श्रुतिकीर्तनं गुरु(हृदि)सदा श्रीराममुक्तिप्रदं
श्रीरामं रघुनन्दनं भयहरं श्रीरामरक्षामणिम् ।
श्रीरामं नवरत्नकुण्डलधरं श्रीरामचन्द्रोदयं
श्रीरामस्य सहस्रभानुसदृशं श्रीरामचन्द्रं भजे ॥
सर्वशास्त्रार्थसम्पन्नस्सर्वैर्द्रव्यैरुपाश्रितम् ।
चिकित्सासारसङ्ग्रहोऽयं चिकित्सासारसङ्ग्रहे ॥

रक्तपैच्यचिकित्सा—

उष्णाम्ललवणक्षारैः कटुभिस्तिक्तदूषणैः ।
यकृत्प्लीहाश्रितं रक्तमूर्ध्वश्चाधः प्रवर्तते ॥
* * * *
नवनीतं लाजचूर्णं मत्स्यण्डीसहमाक्षिकम् ।
माक्षिके च घृतं दद्याद्रक्तपित्तहरं परम् ॥

End:

त्रिवृता सर्वभागानि सर्वं सर्वं च शर्करा ॥
उष्णोदकानुपानेन इच्छाभेदी रसः स्मृतः ।
अयःपतिरसो नाम अश्विनीदेवनिर्मितम् ॥

मधूकतैलम्—

मधूकयष्टिकल्काभ्यां गुळूच्या स्वरसेन च ।
तैलं हन्ति शिरस्तोदं वातपित्तकफं हरेत् ॥

No. 13141. चिकित्सासारसङ्ग्रहः, आन्ध्रटीकासहितः.

CIKITSĀSĀRASAṄGRAHAḤ WITH TELUGU MEANING.

Pages, 37. Lines, 21 on a page.

Begins on fol. 171*b* of the MS. described under No. 160 of the Telugu Descriptive Catalogue of MSS.

Similar to the above.

Beginning:

व्यायामतीक्ष्णरुक्षाद्या(त्)मद्यमत्स्यादिसेवनात् ।
अजीर्णादतिवेगाच्च मूत्रकृच्छ्रं सदा भवेत् ॥
मूत्रं वेगान्मुहुर्मुक्तं भवेदल्पाल्पमुत्कटम् ।
मेढ्रमध्ये वेदनं च कुक्षौ गुल्मविकारकृत् ॥
मूत्रकृच्छ्रमिदं ज्ञेयं वातजं वैद्यपुङ्गवैः ॥

* * * *

वातजं लिङ्गवैकल्यमल्पं पैत्यं च दाहकृत् ।
कफं च शीतलं सान्द्रं दुश्चिकित्सं त्रिदोषजम् ॥

* * * *

छागयूषं घृतं वाथ मुद्गयूषं घृतोदनम् ।
भक्षयेद्वा पिबेद्रात्रौ सघृतं सैन्धवं बुधैः ॥

End:

मूलिकोत्पाटनं कुर्यात् बलिं दद्यात् सुरक्षितम् ।
कृष्णपक्षे चतुर्दश्यां भानुभौमार्यवासरे ॥
पुष्ये पुनर्वसूहस्ते मूले रेवति चाश्विनी ।
अमायां तु रवौ पौर्णे मूलिकोत्पाटनं शुभम् ॥

Colophon:

इति श्रीचिकित्सासारसङ्ग्रहे ज्वरचिकित्सायां ज्वरनिवारणबन्धनमूलिकापहरणधारणधूपबलिस्समाप्तः ॥

No. **13142.** चिकित्सासारसङ्ग्रहः, आन्ध्रटीकासहितः.

CIKITSĀSĀRASAṄGRAHAḤ WITH TELUGU MEANING.

Pages, 36. Lines, 21 on a page.

Begins on fol. 124*a* of the MS. described under No. 13124.

Incomplete.

Similar to the above. The author says that this work is intended for beginners and that herein he has collected and given the essence of the science of pathology.

Beginning:

हरिनीलदलश्यामं हरिद्रावर्णवाससम् ।
हरिं ध्यायेत्पति . . . . शुमिस्थि(चिस्मि)तम् ॥

* * * *

सारमेव समाहृत्य चिकित्सितमहोदधेः ।
क्रियते बालबोधार्थं चिकित्सासारसङ्ग्रहः ॥

* * * *

हीनाहारविहार उच्यते

* * * *

मात्राशी सर्वकालं स्यान्मात्रा ह्यग्निप्रवर्तिका ।
गुरूणामर्द(र्ध)सौहित्यं लघूनां नातितृप्तता ॥
मात्राप्रमाणं द्रव्याणां सुखं तावद्विजीर्यति ।

* * * *

भोजनं हीनमात्रं तु बलोपचयौ(यमो)जांसि ।
सर्वेषां वातुरोगाणां हिमतां च प्रदद्य(द्य)ते ॥

End:

पाठापीतोष्णपयसा प्रातरेव दिनैस्त्रिभिः ।
सीतिकां कम्पबहुलां नाशयेल्लशुनो यथा ॥

* * * *

काकजङ्घाबलाकान्तातुलसीविश्वसाधितम् ।
जलमुष्णं पिबेत्प्रातः शीतज्वरनिकृन्तनम् ॥

No. **13143.** चिकित्सासारसङ्ग्रहः, आन्ध्रटीकासहितः.

CIKITSĀSĀRASAṄGRAHAḤ WITH TELUGU MEANING.

Substance, paper. Size, 14¼ × 9⅜ inches. Pages, 400. Lines, 32 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Rasaratnākara (with Telugu meaning) 201*a*, Balarāmacaritra (Telugu) 250*a*, Caturvāṭikāmāhātmyamu (Telugu) 272*a*, Saṅkaragranthamu (Telugu) 313*a*.

Complete.

Same work as the above.

See under the previous number for the beginning.

End:

विषतरुपलमाज्यप्रस्थयुग्मे ऽर्कशिग्रुस्वरसलिकुचवारिप्रस्थमेकैकशश्च ।
कनकवरणचित्रापत्रनिर्गुण्डिका स्यात् सुरसतुरगगन्धा वैजयन्ती रसस्य ॥

पृथगिति परिकल्प्य प्रस्थभागेन सर्वं विषतरुफलमज्जातुल्यतैलेन युक्तम् ।
स्वरसमपि च चिश्वापीलुशैलेयकार्द्राप्रभवमपि च सर्पिःक्षीरचित्रोत्थतैलम् ॥
सकलमपि मिलित्वा तैलतुल्ये विपक्कं लशुनसरलयष्टीकुष्ठसिन्धूत्थयुक्तम् ।
दहनमिलिकणाना(?) चन्दनेतालवङ्ग(?) नतनतशिकिरान्मपालिकानां विपक्कम्(?) ॥
हरति सकलवातान् घोररूपानसाध्यान् प्रतिदिनमनुलेपाद्वात्ययुक्तस्य जन्तुः(न्तोः) ॥

Colophon:

चिकित्सासारसंग्रहं संपूर्णम् ॥

No. **13144.** चिकित्सासारसङ्ग्रहः, आन्ध्रटीकासहितः.

CIKITSĀSĀRASAṄGRAHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, $18\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 240. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Rasaratnākara 121*a*.

Complete.

Same work as the above.

No. **13145.** चिकित्सासारसङ्ग्रहः, कर्णाटकटीकासहितः.

CIKITSĀSĀRASAṄGRAHAH WITH KANARESE MEANING.

Substance, palm-leaf. Size, $13\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 166. Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Incomplete.

A treatise on pathology. The author, in the beginning of the work which is extracted here, gives a long list of authors and works consulted by him.

Date of copying: 5th day of the bright fortnight of the Jyēṣṭhā month in the year Nandana. Former owner of the MS. is given as Doḍḍa Veṅgayyan.

Beginning:

रसार्णवं बाहटं(च) पारिजातं च कौमुदीम् ।
नागार्जुनं च कापालं दामोदरमतं तथा ॥
रसप्रसिद्धसारं च सूत्रस्थानं च पिल्लटम् ।
कल्याणभेषजं कल्पं सूत्रस्थानं च सङ्ग्रहम् ॥
कापालमिन्दुनाथं च गुणचिन्तामणिं तथा ।
शारीरं वीरभद्रीयं वेददीपकमेव च ॥

सोमनाथं महाशास्त्रं नन्दनाथं चिकित्सितम् ।
वैद्यमुक्तावलिं सर्वं केरुटं चक्रवर्ति च ॥
सोमराजीयदेवेशं चन्द्रज्ञानं च चरकम् ।
नैघण्टादीनि शास्त्राणि दृष्ट्वा श्रुत्वा बहूनि शं(च) ॥
पक्षज्वरादिदृष्यान्तं गुरुनाथप्रसादितम् ।

* * * *

आदिवैद्यं शिवं नत्वा . . . चरकादिभिः ।
प्रायस्सारं समुद्धृत्य चिकित्सासारसङ्ग्रहम् ॥

* * * *

स्वयमग्निरसो वाद(ः) दान(त)व्यो गदशान्तये ।
दुष्टो वा कथितो ग्रन्थः पादहृन्नाभिवस्तुषु ॥
तद्धल्मं पञ्चधा ख्यातमचलं चञ्चलं क्वचित् ।

End:

उदरे च चतुष्कं च द्रव्यलाभं सुखं भवेत् ।
नाभिद्वयं धनं कुर्यात् द्वे गुह्ये तनुनाशनम् ॥
चतुःपृष्ठ.

No. **13146.** ज्वरौषधम्.

JVARAUṢADHAM.

Pages, 8. Lines, 7 on a page.

Begins on fol. 19*a* of the MS. described under No. 429.

Incomplete.

On the preparation of medicines for the treatment of fevers

Beginning:

चन्द्रहासरसम्—

द्विभागं पारदं दद्यात् षड्भागं शुद्धगन्धकम् ।
दरदेन द्विभागं च चतुर्भागं च टङ्कणम् ॥
अमृतेन द्विभागेन शिलायां च द्वयं तथा ।
सुराकारं चतुर्भागं तिकटुं षोडशं तथा ॥
लवङ्गेन द्वयं चैव जाजीफलद्विभागिकम् ।
दन्तिबीजसमं चैव जम्बीररसमर्दितम् ॥

भृङ्गराजं च निर्गुण्डीनागवल्लयार्द्रकेण च ।
त्रिफलाया रसं चैव मर्द्यं घटिचतुष्टयम् ॥

End :

निम्बागुलूची भूनिम्बा त्रिफला कटुकत्रयम् ।
मुस्ता पर्पटखर्जूरं त्रिजातं चव्यशारिबा ॥
एतत्सर्वं समं कृत्वा शर्करा तत्समं भवेत् ।
प्रातःकाले पिबेन्नित्यं मधुमिश्रन्तु लेह्यया ॥
वर्जयेत्तिलपिण्याकं क्षीरान्नं पथ्यमाचरेत् ।
जीर्णज्वरे च मन्दाग्नि आध्मानं शूलमेव च ॥
अस्थिमज्जाज्वरं दोषं मांसमेव गतं तथा ।
देहपुष्टिकरं चैव सर्वधातुविवर्धनः ॥

No. 13147. त्रैलोक्यचिन्तामणिरसनिरूपणम्, आन्ध्रटीकासहितम्.

TRAILŌKYACINTĀMAṆIRASANIRŪPAṆAM WITH TELUGU MEANING.

Pages, 3. Lines, 22 on a page.

Begins on fol. 167*a* of the MS. described under No. 13117.

Complete.

Gives the preparation of the medicine called Trailōkyacintāmaṇirasa with a list of diseases which it is considered efficacious in curing.

Beginning :

रसं वज्रं हेमतारं ताम्रतीक्ष्णाभ्रकान्वितम् ।
गन्धकं मौक्तिकं शङ्खं प्रवालं तालकं शिला ॥
शोधितं तु समं सर्वं सप्ताहं भावयेत् दृढम् ।
निर्गुण्डी सूरणद्रावैः वज्रदुग्धे दिनत्रयम् ॥

* * *

चतुर्गुञ्जामिदं खादेत् सर्वरोगप्रशान्तये ।

End :

वाताविधृतिशूलपाण्डुग्रहिणीरक्तातिसारान् जयेत्
गुल्मप्लीहजलोदराश्मरितृषः शोफां हलीमोदरम् ।
लूताकृच्छ्रभगन्धरज्वरगणानर्शांसि कुष्ठान्यहो
साध्यासाध्यरुजा निहन्ति च रसः त्रैलोक्यचिन्तामणिः ॥

No. 13148. दत्तात्रेयमतम्, आन्ध्रटीकासहितम्.

DATTĀTRĒYAMATAM WITH TELUGU MEANING.

Pages, 55. Lines, 7 on a page.

Begins on fol. 145*a* of the MS. described under No. 13126.

Incomplete.

A treatise dealing with the symptoms, diagnosis and treatment of diseases, and also with the preparation of various medicines, etc.

Beginning :

नारायणं गुणावासं वन्दे षटत्रिंशकं विभुम् ।
नरं च जन्तुतत्त्वानां तदांशं पञ्चविंशकम् ॥
नाडीनां लक्षणं वक्ष्ये दत्तात्रेयमतानुगम् ।
यदभ्यासं न जनाति चित्रां प्राणगतिं सुधीः ॥
पञ्चभूतात्मको देहस्त्रिदोषस्सप्तधातुकः ।
त्रिगुणोऽनेकविकृतिरनेकमलसञ्चयः ॥

* * * *

स्पर्शनात् पीडनात् घातात् स्वेदनान्मर्दनादपि ।
तासु(च) प्राणसञ्चारं प्रयत्नेन विशोधयेत् ॥
विज्ञेयनाडिका वक्ष्ये सामान्येन मतक्रमात् ।
पादयोर्हस्तयोः कण्ठमूलयोर्घ्राणमूलयोः ॥
पादयोर्नाडिकास्थानात् गुल्फस्य ध्यङ्गुलित्रयम् ॥

* * * *

Colophon :

इति नाडीतत्त्वविधौ दत्तात्रेयमते प्रथमोऽध्यायः ॥

End :

आढकं सूपपत्यं(कं) च ताम्बूलं सेवितं नरः ।
क्षीणां च रोगसंहारं नानारोगहरं परम् ॥
मृतसूतं देवदारु त्रिकटुश्चेन्द्रवारुणी ।
शर्करासहितं खादेच्छ्वासकासहरं परम् ॥

* * *

देवदानवगन्धर्वयक्षराक्षसपन्नगाः ।
पिशाचादितरं चेति भूतग्रहगणोऽष्टधा ॥

No. 13149. दूताध्यायः.
DŪTĀDHYĀYAḤ.

Pages, 5. Lines, 22 on a page.

Begins on fol. 142*a* of the MS. described under No. 13124.

Incomplete.

On the characteristics of a proper messenger to be sent to a physician and on certain inferences that may be drawn by him regarding the would-be state of health of the patient by observing the bodily movements, etc., of the messenger.

Beginning:

पृच्छेदार्तिषु संयुक्तो भुक्तिमष्टविवर्जिते ।
एकादिशून्यहस्ते वा अज्ञानं तस्य तां व्रजा(जे)त् ॥
पाषण्डाश्रमवर्णानां सवर्णं कर्मसिद्धये ।
तयोरविपरीतास्तु दूतकर्म विवर्जयेत् ॥
दीनं भीतं द्रुढध्वस्तं रूक्षकाष्ठादिभेदिनम् ।
नानुगच्छेद्भिषक् दूतमाह्वयन्तं च दूरतः ॥

End:

वज्रदंष्ट्रधरारौद्रक्षुरतूणीधनुर्धरा ।
भर्त्सयन्ति पार्श्वचरा दष्टोष्ठो रक्तलोचनः ॥
व्याधयो विविधा ज्ञेया रूपायुधविभूषणैः ।
व्याधितस्याकृतीरस्मात्तद्व्याधीरपि निर्देशेत् ॥

No. 13150. देहतत्त्वनिर्णयः, आन्ध्रटीकासहितः.
DĒHATATTVANIRṆAYAḤ WITH TELUGU MEANING.

Pages, 11. Lines, 24 on a page.

Begins on fol. 103*b* of the MS. described under No. 13117.

Complete.

An explanation of the various parts and functions relating to the body. This treatise is probably a compilation from various works from which quotations are given herein.

Beginning:

पञ्चभूतात्मको देहस्त्रिदोषस्सप्तधातुकः ।
त्रिगुणोऽनेकविकृतिरनेकमलसञ्चयः ॥

* * * *

शारीरे—

शब्दस्पर्शश्च रूपं च रसो गन्धः क्रमात् गुणाः ।
खानिलाग्नयब्भुवामेकगुणवृद्ध्यन्वयाः परे ॥

* * * *

ग्रन्थान्तरे—

यत्कठिनं सा पृथ्वी यद्द्रवं जलमुच्यते ।
यदुष्णं च तदा तेजः वायुस्सञ्चरति त्वरा ॥
आकाशं महदाकाशे भूतधर्ममिति स्मृतम् ।

End:

ग्रन्थान्तरे—

भुक्ताहारो द्वितीयेऽह्नि रसत्वमुपपद्यते ।
शोणितं तु तृतीयेऽह्नि चतुर्थे मांसतामपि ॥
मेदस्त्वं पञ्चमे याति अस्थित्वं याति षष्ठके ।

* * * *

अज्ञानं मोहनिद्रां च चापल्यं बुद्धिहीनता ।
पाशेष्टं परबाधत्वं तामसं गुणलक्षणम् ॥

Colophon:

देहतत्त्वम् ॥

No. 13151. नाडीनिदानम्, सव्याख्यानम्.
NĀḌĪNIDĀNAM WITH VYĀKHYĀNA.

Pages, 10. Lines, 6 on a page.

Begins on fol. 135*a* of the MS. described under No. 13082.

Incomplete.

A commentary on the Nāḍīnidāna which is a treatise on the science of feeling the pulse, said to have been revealed by the twin celestial brothers Aśvins.

Beginning:

आदौ समस्तरोगेषु अष्टस्थानं परीक्षयेत् ।
नाडीं च स्पर्शरूपं चं शब्दनेत्रपुरीषयोः ॥
नाभिस्थानं च जिह्वा च एता दृश्या भिषग्वरैः ।

आदौ रोगपरीक्ष(ण)स्यादौ समस्तरोगेषु वातश्लेष्मपित्तगतसर्वरोगेषु । अष्टस्थानगतनाडीं परीक्षयेत् शोधयेत् ।

End:

सर्वेषां रोगाणाम् एतत षड्गुणाः शुभाः ।

Colophon:

अश्विनीदेवताकृतौ नाडीपरीक्षासप्तविंशतिश्लोकाः समाप्ताः ।

वातानां श्लेष्मपैत्यानामाधारिकः प्रजायते ।

नाभ्यादिपादमूलान्तकरमूलं तु वर्तते ॥

*   *   *   *

सर्वेषां सर्वनाडीनां तथाधारे योजयेत् । तर्जन्याङ्गु.

No. 13152. नाडीपरीक्षा, आन्ध्रटीकासहिता.

NĀḌĪPARĪKṢĀ WITH TELUGU MEANING.

Pages, 10. Lines, 24 on a page.

Begins on fol. 109*a* of the MS. described under No. 13117.

On the method of feeling the pulse with a view to ascertain the state of the health of a person and to diagnose his disease. Quotations are given herein from different works.

Beginning:

श्रीनीलकण्ठं भुजगेन्द्रभूषणं नागाजिनं राजकलाकलापिनम् ।

गौरीश्वरं देवमुनीन्द्रसेव्यं देवं भजे श्रीगिरिराजनाथम् ॥

निदानं संप्रवक्ष्यामि संक्षिप्तं सूक्तमुत्तमम् ।

आदौ सर्वेषु रोगेषु स्थानान्यष्टौ परीक्षयेत् ॥

नाडीमूत्रमलं जिह्वा शब्दस्पर्शं च रूपदृक् ।

एताः परीक्ष्य सद्वैद्यः पश्चाद्रोगं चिकित्सयेत् ॥

*   *   *

नाडीपरीक्षा—

मूर्ध्नि कण्ठे करे चैव नाभिपादेषु पञ्चसु ।

एषु सप्तसु नाडीनां करे मुख्यप्रधानतः ॥

*   *   *   *

ग्रन्थान्तरे—

द्विसप्ततिसहस्राणां नाडी(?) मुख्याश्चतुर्दश ।

आसां मुख्यतमास्तिस्रस्तिसृष्वेकोत्तमा मता ॥

End:

यत्र सधार्येज्जीवं स नाडी प्राणधारकः ।

क्रमनाडी परिज्ञेया हस्तनाडी त्रिवाहिनी ॥

वातपित्तकफाज्ञानि तामसी राजसी तथा ।

सर्वाङ्गुलस्त्रिधामेति ज्ञातव्यं नाडिका ध्रुवम् ॥

No. 13153. नाडीलक्षणम्.

NĀḌĪLAKṢAṆAM.

Pages, 10. Lines, 7 on a page.

Begins on fol. 85*a* of the MS. described under No. 13082.

A treatise on the science of feeling the pulse for finding out the state of the health of a person, with hints for the diagnosis of diseases.

Beginning:

नाडीनिदानम्—

प्रदर्शये(त्) दोषमिदं स्वरूपं व्यस्तं समस्तं युगलीकृतं च ।

मूकस्य मुग्धस्य विमोहितस्य दीपः पदार्थाहि(निव)जीवनाडी ॥

सद्यस्स्नातस्य भुक्तस्य क्षुत्तृष्णातपशीलिनः ।

व्यायामाक्रान्तदेहस्य सम्यङ् नाडी सुबोधयेत् ॥

हस्तात्ततो दक्षिणतः प्रकोष्ठे तज्जीवनाडिव चरत्प्रयत्नः ।

अन्ये च पाणि(ण्य)ङ्गुलिकात्रयेण प्राण . मुपागम्य वदेत् त्रिदोषान् ॥

हस्तप्रकोष्ठबाह्वास्यमध्यपार्श्वसमाश्रितः ।

जीवनाडीति च प्रोक्तं नन्दिना तत्त्ववेदिना ॥

End:

अणुमात्रेण दोषेणन रोगी . . . वासरे ।

आम्लतैलगुडं क्षौद्रं पानगव्यचतुष्टयम् ।

नवज्वरेषु सप्ताहं सन्निपातस्य हेतवः ॥

No. 13154. नाडीविज्ञानम्, आन्ध्रटीकासहितम्.

NĀḌĪVIJÑĀNAM WITH TELUGU MEANING.

Pages, 10. Lines, 24 on a page.

Begins on fol. 114*a* of the MS. described under No. 13117.

Foll. 118*b* to 119*b* contain the meaning in Telugu of certain stanzas in the Sūtrasthāna of the Aṣṭāṅgahṛdaya.

Incomplete.

Similar to the above. Quotations are given from Gadāsañjīvinī. The author salutes Vardhamāna in the beginning.

Beginning:

श्रीवर्धमानमानम्य निर्जिताखिलदोषकम् ।

ब्रवीमि नाडीविज्ञानं समस्तजनपूजितम् ॥

*   *   *   *

समस्तदेहानुगता नराख्यमिति मानवाः ।
तेषु नाडी प्रसिद्धं ते सर्वरूपानुचारिणी ॥

* * * *

गदसञ्जीविन्याम्—

नाभिस्था कुण्डली शक्तिर्भुजङ्गाकाररूपिणी ।
ऊर्ध्वगा दश नाड्यस्तु दशैव समधोमुखाः ॥
तिर्यगूर्ध्वमधश्चैव व्याप्तस्ताभिस्तु सर्वदा ।
द्विसप्ततिसहस्राणि नाड्यस्तु वपुषि स्थिताः ॥
वातपित्तकफोत्पन्नं यथा सञ्चारिणां(?) तथा ।

End:

दिनेन बहुला नाडी क्रमेण धातुना सह ।
भूतगुणैर्धातुगुणैः परिज्ञानाभि(?) नाडिभिः ॥

* * *

प्रभिन्नभिन्नमेतानि ज्ञातव्यं धातवो गुणाः ।

No. 13155. नाडीशास्त्रसङ्ग्रहः, आन्ध्रटीकासहितः.

NADĪŚĀSTRASAṄGRAHAḤ WITH TELUGU COMMENTARY.

Substance, palm-leaf. Size, 13⅜ × 1½ inches. Pages, 28. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the fourth Adhyāya.

Similar to the above. It is stated herein that this science has been revealed by Paramaśiva to Pārvatī who requested her husband to enlighten her on the nature of pulsation, its differences, number and other details connected with it.

Beginning:

श्रीनाथं पार्वतीनाथं वाणीनाथं सरस्वतीम् ।
दुर्गावटुकहेरम्ब(न्) नमस्यामि शुभाय ते ॥
मौलौ मायूरपिञ्छं मृगमदतिलकं फालदेशे च बिभ्रत्
योऽङ्गुल्यग्रैश्चलद्भिर्नवरुचिरुचिरैः पीडयन्वंशिकां च ।
गायंस्तां कुञ्चिते(न)स्फुरदधरपुटेनाभिपूर्य प्रमोदं
चक्रे गोपाङ्गनानां स वि(दि)शतु सततं बालकृष्णः शुभं नः ॥
गणेशं शरदां मातापितरौ च गुरूंस्तथा ।
नमामि वाहटाचार्यानायुर्वेदाब्धिपारगान् ॥

कैलासाद्रौ रुचिरभवने पद्मजातादिदेवैः
सर्वाधीशैः परशिवकृपाकाङ्क्षिभिः सेव्यमानम् ।
सत्यानन्दं परमपुरुषं दिव्यसिंहासनस्थं
पप्रच्छेशं सकलजगतामीश्वरी सा भवानी ॥

पार्वती—

भगवन् करुणासिन्धो पिण्डोत्पत्त्यादिकं महत् ।
त्वया प्रपञ्चितं सम्यक् मयि कारुण्यतः प्रिय ।
नाडीस्वरूपं तत्सङ्ख्यां तद्भेदांस्तद्गतीस्तथा ।
तत्तद्गतिवशादायुरेतदायु(शु)वद प्रभो ॥
इति पृष्टो गिरिजया यदुवाच महेश्वरः ।
तचान्यच्छास्त्र(चात्र)संगृह्य यथाशास्त्रं प्रकल्पयेः ॥

Colophon:

इति नाडीशास्त्रार्थसङ्ग्रहे प्रथमोऽध्यायः ॥

* * * *

इति नाडीशास्त्रसारसंग्रहे अष्टमुनिभिर्विरचितं नाम तृतीयोऽध्यायः ॥

End:

कुटिलं शिथिलं सूक्ष्मं मन्दं च चलसङ्गतिम् ।
सन्निपातोद्भवा नाडी वैद्यो जानाति निश्चयम् ॥

No. 13156. नानाविधौषधकल्पः, आन्ध्रटीकासहितः.

NĀNĀVIDHAUṢADHAKALPAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 244. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

On various details connected with the preparation of medicines including the repetition of the proper Mantras, etc.

Beginning:

अथौषधकल्पं लिख्यते—

धुत्तूरकल्पम्—

कृष्णपक्षे चतुर्दश्यां गुरुपुष्येऽथ लक्ष्मणाम् ।
समन्त्रं तु समुच्चार्य सोपचारं समुच्चरेत् ॥
ओं सर्वार्थसाधनी लक्ष्मणाय स्वाहा ॥

शुभं तन्मूलमादाय कृष्णोन्मत्तं फले स्थितम् ।
त्रिदिनं च स्वशुक्रेण मन्त्रे चूर्णे तवकृतम् (?) ॥
लोचनालक्ष्मणामूलं चन्दन कुङ्कुमं समम् ।
मुखलेपादितः सर्वे विशेषे नरमोहनम् ॥

End:

चित्रमूलकलेह्यानामूर्ध्वश्वासहरं परम् ।
कटुकारी च लेहा(ह्या)नां क्षयकासनिकृन्तनम् ॥
कुण्डल्यादि च लेह्यानां रक्तकासं च नाशयेत् ।
* * * *
व्याघ्रादिलेह्यपानेन दिवाश्लेष्मं च नाशनम् ।
भाङ्गर्यादिलेह्यपानेन तिमिरं श्लेष्मजं परम् ॥
पञ्चमूलकलेह्येन दधिश्लेष्महरं परम् ॥

No. 13157. निदानग्रन्थः, आन्ध्रटीकासहितः.

NIDĀNAGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 448. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 47*a*. The other works herein are Vaidyacintāmaṇi 1*a*, Rāmastava 40*a*.

On the names of maladies, their forms, characteristics, their symptoms and other details for diagnosing them together with their treatment. The authors Śiṅgābhaṭṭa and Bāhaṭa are referred to in the beginning.

Beginning:

वायुर्व्यायामसंजातं पित्त(त्तं)पावकसंश्रितम् ।
श्लेष्मं सलिलसञ्जातं त्रयोदोषमिदं भवेत् ॥
अशीतिवातसञ्जातमनुग्रहं च लक्षणम् ।
जननं वातरोगाणां दशवातमशीतिगम् ॥
पृथग्रूपाणि नामानि जननी शास्त्रसंमतम् ।
निदानं भाषितं चैव नवशास्त्रविशारदः ॥
अशीतिर्वातरोगाणि श्रीगर्भप्रविकासितम् ।
नानाजीवविकारेण नानाशास्त्रेण संमतम् ॥
* * *

अशीतिवातरोगाणां नामानि—
अङ्गुलीपादवातश्च जानुवातोरुजस्तथा ।
कटिवातं मेढ्रवातं पार्श्वहृत्कुक्षिवातजम् ॥
* * * *
एते नामानि वातानि अशीतिर्गुणसंयुतम् ॥
बाहटाचार्यवर्येण प्रसादं लोकविश्रुतम् ।
सर्वशास्त्रेषु सर्वज्ञशिङ्गाभट्टीयभाषितम् ॥
* * * *

Colophon:

इत्यभिवातनिदाने प्रथमोऽध्यायः ॥
* * * *

Colophon:

इति हृद्रोगनिदानचिकित्सा समाप्ता ॥

End:

अथ हलीमुखनिदानचिकित्सामाह—
हरितश्यामपीतत्वं पाण्डुरोगे यथा भवेत् ।
वातपित्ताङ्गमस्तृष्णा त्रिष्वहर्षो वमिज्वरः ॥
तन्द्राबलानिलभ्रंशबोधनं तु हलीमुखम् ।
अधिकं चैव कण्डूतिस्तेषां पूर्वमुपद्रवाः ॥
चिकित्सा—
महिषा हविषा स्निग्धः पिबेद्धात्रीरसेन तु ।

No. 13158. निदानग्रन्थः—आन्ध्रटीकासहितः.

NIDĀNAGRANTHAḤ WITH TELUGU MEANING.

Pages, 4. Lines, 7 on a page.

Begins on fol. 82*b* of the MS. described under No. 13082.

Incomplete.

Similar to the above.

Beginning:

यदैव चन्द्रार्कसुमण्डलं महत् त्रिखण्डमाखण्डलकार्मुकच्छविः ।
प्रदृश्यते चित्रसमेतमेव वा न जीवतीक्षं(त्थं) खलु वत्सरं नरः ॥
* * * *

यस्य चानुगतं मर्म न किञ्चिदपि चेष्टते ।
मासान्ते मरणं किञ्चित् गतेनापि विलम्ब्यते ॥

पक्षनाडी—

नाडीस्थानं गुदं यस्य कुरुते ताल्लुता मुहुः ।
छागगन्धि शरीरं स्यात् पक्षमेकं न जीवति ॥

End:

षण्मासत्रितयैर्द्वये प्रथमत पश्चाद्दशाहं तथा
पश्चाहं म्रियते च धूमशिखया सौम्यर्तुकाले रवौ ॥

Colophon:

इति स्वस्थारिष्टनिदानः समाप्तः ॥

No. 13159. निदानग्रन्थः, आन्ध्रटीकासहितः.

NIDĀNAGRANTHAḤ WITH TELUGU MEANING.

Pages, 64. Lines, 7 on a page.

Begins on fol. 73*a* of the MS. described under No. 13115.

Similar to the above.

Beginning:

निषादराजपट्टणं विदर्भराजकन्यका हिरण्यगर्भतोषणं कुमारिवारिसम्भवम् ।
विराजमानराजराजसोदरीमनोहरं व्यधत्पदं द्वितीयकं पृथक्पृथक् पलं पलम् ॥
कथाष्टमां शिवाह्वयं च सूकरप्रमाणकम् ।
ध्वजः पतत्रिशालिना धनुर्जयप्रवर्धनम् ॥

मेहनिदानम्—

स्वेदोऽङ्गगन्धे शिथिलत्वमङ्गे शय्यासनस्वप्नसुखाभिषङ्गः ।
हृन्नेत्रजिह्वाश्रवणेषु दाहः मिन्नाङ्गतापेजभाज(केशनखाभि)वृद्धिः ॥

End:

शुण्ठीसौवर्चलं हिङ्गु दाडिमं चाम्लवेतसम् ।
चूर्णमुष्णाम्बुना पेयं वातहृद्रोगनाशनम् ॥

No. 13160. निदानग्रन्थः, आन्ध्रटीकासहितः.

NIDĀNAGRANTHAḤ WITH TELUGU MEANING.

Pages, 59. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 13122.

Wants the beginning and end.

Same work as the above.

No. 13161. निदानमुक्तावली.

NIDĀNAMUKTĀVALĪ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 81*a* of the MS. described under No. 13082.

Contains the Kālāriṣṭa and the Svasthāriṣṭa.

This is a treatise on diagnosis of diseases and was written by Pūjyapāda. From a comparison of the colophons given in this MS. as well as in the MSS. described under the next two numbers it may be stated that the work is also called Siddhāntibhāṣya and the author Dēvacandra.

Beginning:

रिष्टं दोषं प्रवक्ष्यामि सर्वशास्त्रेषु सम्मतम् ।
सर्वप्राणिहितं दृष्ट्वा कालारिष्टं च निर्णयम् ॥
पादाङ्गुष्ठौ च गुल्फौ च जङ्घमूलौ तु सूक्ष्मतः ।

* * * *

कालारिष्टं प्रकुर्वीत मासमेकं न संशयः ।

* * * *

इन्द्रं(रन्ध्रं)पश्यति मध्यमं दशदिनं मा(धू)माकुले पक्षमं
ज्वालां पश्यति तद्दिने हि मरणं ख्यातन्त्विदं तद्भवम् ॥

Colophon:

इति पूज्यपादविरचितायां कालारिष्टनिदानं समाप्तम् ॥

End:

विज्ञाय यो नरः काललक्षणैरेवमादिभिः ।
न भूयो मृत्यवे यस्मात् विद्वान् कर्म समाचरेत् ॥

Colophon:

इति पूज्यपादविरचितायां स्वस्थारिष्टनिदानं समाप्तम् ॥

No. 13162. निदानमुक्तावली.

NIDĀNAMUKTĀVALI.

Pages, 8. Lines, 6 on a page.

Begins on fol. 64*a* of the MS. described under No. 13115.

Contains the Svasthāriṣṭanidāna and the Kālāriṣṭanidāna.

Same work as the above, but with two different colophons which are given below.

Foll. 67*b* to 73*b* contain Sannipātadyanupāna, Rasamāhātmya and Nasyāñjana.

न भूयो मृत्यवे यस्मात् विद्वान् कर्म समाचरेत् ॥

Colophon:

(श्री)मज्जठरश्चेशिकमन्त्रवादषड्भाषाकविचक्रवर्तिश्रीपूज्यपादस्वामिविरचिते सिद्धान्तिभाष्ये अरिष्टनिदानो द्वादशोऽध्यायः ॥

Colophon:

इति देवचन्द्रभिषग्विरचितायां निदानमुक्तावल्यां कालारिष्टनिदानं समाप्तम् ॥

No. 13163. निदानमुक्तावली.

NIDĀNAMUKTĀVALĪ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 13122.

Contains the Svasthāriṣṭanidāna and the Kālāriṣṭanidāna

Same work as the above, with colophons.

Foll. 10 to 14 contain Sannipātādyanupāna, Rasamāhātmya and Kākabinduvādighṛta.

No. 13164. निदानयोगरत्नावलिः.

NIDĀNAYŌGARATNĀVALIḤ.

Substance, palm-leaf. Size, 18¾ × 1⅝ inches. Pages, 302. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

A work on pathology by Telkurāya, son of Śiṅgayadēśika of Pulpāka family. The author says that he first explains the origin, the diagnosis and the treatment of fever.

Copied by Sarvēśaliṅga on Saturday, the 3rd day of the bright fortnight of the Mārgaśira month in the year Vyaya.

Beginning:

सीताजानिं राक्षसानां विरोधं बद्धाऽध्यायं भक्तकल्पं कृपालुम् ।
योगिध्येयं चिन्मयं सार्वसर्वमिष्टावाप्त्यै रामचन्द्रं भजेऽस्मि ॥
घनाघनतिरोधानसौभाग्यच्छाय(विग्रहम्) ।
भक्तानन्दनमीडेऽस्मि दशस्यन्दननन्दनम् ॥
सा वामनाम्बा स च शिङ्गयार्यः श्रीरामचन्द्राङ्घ्रिसरोजहंसम् ।
शान्तं दयावन्तमधीतभावं यं तेल्कुरायाख्यमसूत सूनुम् ॥

पुल्पाकवंशमणिशिङ्गयदेशिकस्य सूनुर्विशिष्टगुणभूषितवान् जितात्मा ।
श्रीतेल्कुराय इति विश्रुतनाम सोऽहं लोकोपकारकरणाय फलागमाय ॥
दृष्ट्वा सम्यगशेषवैद्यभणितीः पूर्वांश्च सूत्रक्रमात्
तत्तच्छास्त्रगसर्वयोगसमितिं सङ्गृह्य योगावलिम् ।
पुल्पाकान्वयदुग्धवारिधिकलानाथः सुधीस्तेल्कुयः
श्रीनामा रचयामि सर्वभिषजां मत्या च रामाज्ञया ॥

अथादौ सर्वरोगाणामादितः ज्वररोगाणामुत्पत्तिलक्षणमारभमाणः तस्य रोगनिदानचिकित्सापूर्वकं ग्रन्थसन्दर्भं रचयामि ।

चतुर्विधाजीर्णानि—

धूमो विधूमो विस्पष्टो रसशेषस्तथैव च ।
धूमः स्वभावगन्धः स्यात् विधूमश्चामगन्धिकः ॥
विस्पष्टे चाङ्गवैकल्यं रसशेषे शिरोव्यथा ।
विबन्धस्तीव्रतृत्तिर्वा ग्लानिर्मारुतमूढता ॥

End:

गान्धारसौभाग्यसमाक्रान्तं चाफेनजाजीफलसमायुक्तम् ।
दं(धु)त्तूरनीरेण च वोदपेष्यं गुञ्जाप्रमाणं ह्युचितानुपानम् ॥
दद्यात्प्रपीतं त्वतिसारनाशं प्रख्यातनामग्रहिणीकवाटम् ॥
लोहं टङ्कणसौरभं रसविषं व्योषं च जाजीफलं
चित्रं पत्रमरालदीप्यतिवचाफेनं च दीप्यं समम् ।
एतेषां समभागतुल्यगगनं धूर्तत्वचः क्वाथितं
यामं मर्द्य मरीचिमानवटकं दद्याद्ग्रहिण्यामपि ॥
कर्पूरेण मधूक . . . . भिषग्भिर्भृशं
गङ्गातुङ्गतरङ्गदाहमपि सा रुध्येत सत्यं क्षणात् ।

No. 13165. निदानयोगरत्नावलिः, आन्ध्रटीकासहिता.

NIDĀNAYŌGARATNĀVALIḤ WITH TELUGU MEANING.

Pages, 297. Lines, 22 on a page.

Begins on fol. 1*a* of the MS. described under No. 160 of the Telugu Descriptive Catalogue of MSS.

Incomplete.

Same work as the above.

No. 13166. निदानविषयः.

NIDĀNAVIṢAYAḤ.

Pages, 13. Lines, 6 on a page.

Begins on fol. 22*a* of the MS. described under No. 13090.

Incomplete.

Gives details for diagnosing diseases.

Beginning:

श्रीशं संसेव्य काञ्चीपतिममृतकरं प्राप्तधन्वन्तरीन्दुं
वैद्यग्रन्थं विविित्सुर्जगदुपकृतये जन्तु . . . . ।
आहृत्यायुः श्रुतीनां स्थितिमतिमचिरात्तत्र वक्ष्ये निदानं
द्रव्याणां शुद्धिमुद्यत्प्रतिगत . . . सूतयोगान् कषायान् ॥
तेषां वक्ष्ये निदा . . . . . ममव्याधिनिर्धारणान्तं
नाडीस्पर्शस्वरूपध्वनिनयनशकृन्मूत्रजिह्वाक्रमेण ।
अष्टस्थानं निरीक्ष्य क्षमकृत . . . . . मूले
त्र्यङ्गुल्या स्वान्तदाहुर्यवलवसदृशं सर्वदेहानुवृत्तम् ॥

* * * *

हंसीवच्चाश्वरीकी गतिरिव मलबद्धोत्थनाडीव रौति
त्रोटीवत्सन्निपाते प्रभवति धमनी सैव तीव्रातिभङ्गा ।
मन्दा सूक्ष्माचलाभूदसुभृदवयवान् श्लेष्मपित्तासृगा(त्ता)
प्रातर्मध्याह्नसायेषुभिचरति पृथग्जीवनाडी क्रमेण ॥

End:

आयुर्वेदजबाहटप्रमुखशास्त्रार्थेषु दक्षं शुचिं
सद्दृश्यं गतमत्सरामृतकरं सत्योक्तिमल्पोत्सुकम् ।
शान्तं कान्ततनुं युवानमरुजं वैद्यं चिकित्साचणं
निश्वासोपगता मया विनिपदो(?) गच्छन्ति तद्दर्शना ॥

No. 13167. नृसिंहनिदानम्.

NṚSIṀHANIDĀNAM.

Pages, 110. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13075.

Incomplete.

Similar to the work described above. In the beginning the author Nṛsiṁha gives detailed instructions for feeling the pulse.

Beginning:

आदौ समस्तरोगेषु अष्टस्थानान् परीक्षयेत् ।
नाडीस्पर्शं च(स्व)रूपं च शब्दनेत्रपुरीषयोः ॥
मूत्रवर्णानि जिह्वा च एतद्दृश्यं भिषग्वरैः ।
अङ्गुष्ठमूलमाश्रित्य अङ्गुलत्रयमात्रकम् ॥
आदौ आ(वा)युः कफो मध्ये अन्ते पैत्त्यं च वर्तते ।
यवस्य बीजमात्रं तु नाडी सर्वाङ्गसंगतिः ॥
नारीणां वामभागे तु पुंसां दक्षिणशोध(वाम)योः ।
मण्डूकः पिककाकलावृकगतिः पैत्त्यं च हृद्वेगतां
मायूरं गजहंसकुक्कुटपदं गम्यं स्थितं श्लेष्मजम् ।
कूर्मं सर्पजलूकतां जलचरं वक्रं गतं वातजम्
इत्येवं त्रिविधं विशेषचलनं नाडीपरिज्ञापनम् ॥
हस्तराचित्तपाशवद्वातनाडी वर्तुला कूलपतितमत्स्यवत्पित्तनाडी चञ्चला ।
दुर्बलस्य यानवत् श्लेष्मनाडी मन्दिता नृत्यकीविलासवत्सन्निनाडी विस्मृता ॥

* * * *

Colophon:

इति श्रीप[ति]रहितविष्णुसिद्धान्तसागरादिसूर्यविरचितपण्डितश्रीनृसिंहकृतौ नित्यानन्दनानाशास्त्रसंमताद्यशीतिवातनिदा[ने]नं(नाम) प्रथमोऽध्यायः ॥

End:

क्षयरोगाश्मरीकुष्ठा मेहोदरभगन्धराः ।
अर्शांसि ग्रहिणीकुष्ठौ महारोगाः प्रकीर्तिताः ॥
क्षयरोगज्वरो राजा तस्य पत्नी सुकामिला ।
चमूपतिः पाण्डुरोगं(गो) रक्तपित्तास्तु पुत्रकाः ॥
सख्यः शोभातिसारश्च मन्त्रिणौ श्वासकासकौ ।
गूढचारौ वातपित्तौ वाजिनौ वान्तिकारुची ॥
ग्रहिण्यर्शोगुल्मशूलगायकास्तूर्यवाद्यकम् ।
अनेकरोगानुगतो(ता) बहुरोगपुरस्कृता ।
एवंविधिप्रकारेण क्षयरुग्रोगराड् भवेत् ।

No. 13168. नृसिंहनिदानम्.

NṚSIṀHANIDĀNAM.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 20. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Wants the beginning and the end.

Same work as the above.

No. 13169. पथ्यापथ्यविवेकः.

PATHYĀPATHYAVIVĒKAḤ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 105*a* of the MS. described under No. 13106.

Complete.

A treatise on dietetics.

Date of transcription: Friday, the 3rd day of the dark fortnight of the month of Ādi in the year Naḷa. Name of the scribe: Mājēṭi Vīrēśaliṅgam.

Beginning:

शालीषष्टिकजीर्णधान्यमुदितं यूषं तु मुद्गोद्भवं
रम्भापुष्पपटोलशिग्रुशरसीवार्ताकवास्तूलकम् ।
धात्रीपुष्कर[मूल]बिल्वसूरणबृहत्पूलार्कमाज्यं पयः
तक्रं च ज्वरमोक्षणं च वपुषः पथ्यं विनान्ते हितम् ॥

अपथ्यम्—

शालीयो षष्टिकाजीर्णयूषामुद्गकुलुत्थयां ।
कारवल्लं(च)कर्कोटबालमूलकवास्तुकम् ॥

End:

रसजनिचविदाहं ततो हेमाङ्गदाहो
मलयति घनसारालेपनं मन्दवातम् ।
तरुदधि च तक्रं . . . . . नारिकेले
शिशिरमधुरपानं शीतमन्नं प्रशस्तम् (?) ॥

Colophon:

इति पथ्यापथ्यवर्गः समाप्तः ॥

No. 13170. पारदयोगशास्त्रम्.

PĀRADAYŌGAŚĀSTRAM.

Pages, 30. Lines, 10 on a page.

Begins on fol. 10*a* of the MS. described under No. 7833.

Contains 11 Paṭalas.

A treatise dealing with the process of making certain mercurial preparations considered useful for medicinal purposes, for conferring longevity and for converting baser metals into gold: by Śivarāmayōgin.

Beginning:

देव्युवाच—

देवदेवाखिलाधार भक्तानुग्रहविग्रह ।
बहुधा भवता प्रोक्ता योगाः पारदकर्मणि ॥
तथापि श्रोतुमिच्छामि कौतूहलकरीं क्रियाम् ।
तथा सुलभतस्सिद्धिं भक्तदारिद्र्यभञ्जनीम् ॥

श्रीशिवः—

शृणु देवि प्रवक्ष्यामि विचित्रकरणं परम् ।
कदलीकेतकीपूर्वोकेरापामार्गशिग्रवः ॥
एतेषामाहृतं क्षारं षण्मित्रक्षारमीरितम् ।
षण्मित्रक्षारमेकांशं समकश्वासमिश्रितम् ॥
कश्वासतुलितं योज्यं चेशलवणमुत्तमम् ।
तन्मञ्जरिक्षारतोये पेषितं भावितं पुनः ॥
भानुभानुपरिक्षुण्णं चूर्णं कुर्याद्विचक्षणम् ।
लम्बिकायन्त्रतः पक्वात् द्रावं (गृह्णाति) बुद्धिमान् ॥
मित्रादिद्रावसंज्ञं तं महायोगैकसाधनम् ।

* * * *

Colophon:

इति शिवरामयोगीन्द्रविरचिते प्रथमः पटलः ॥

End:

शुल्बपत्राणि संलिप्य पूगाच्छामीकरं भवेत् ।
एतत्तु दुर्लभं लोके न वाच्यं यस्य कस्यचित् ॥
ततस्तु(त)मुदारेण शङ्खद्रावेण संयुतम् ।
रसगन्धकपर्णं तु मर्दयेत् दिवसत्रयम् ॥

अजक्षीरेण विधिना दद्याच्छिखिपुटं ततः ।
एवं त्रिधा क्रमणात्तद्भङ्गं सूर्यसन्निभम् ॥
* * * *
सततज्वलनमग्निर्दीपिका तत्प्रमाणम्
उदयरविसमानं सूतराजं गृहीत्वा ।
पणमिति चणमात्रं देहलोहेषु योज्यं
परमिति परमायुः काञ्चनं कायसिद्धिम् ॥

Colophon:

इति एकादशः पटलः ॥

No. 13171. प्रकृतिलक्षणम्
PRAKṚTILAKṢAṆAM.

Pages, 13. Lines, 20 on a page.

Begins on fol. 190*b* of the MS. described under No. 13078.

Complete.

On the physical appearance and other characteristics of people according as the one or other of the humours Vāta, Pitta and Kapha is predominent in them and their susceptibility to particular kinds of ailments.

Beginning:

अथोदितानां जातीनां प्रकृतिः कथ्यतेऽधुना ।
श्लेष्मला पित्तला चेति वातला चेति सा त्रिधा ॥
निभृतास्थिग्रन्थिगुल्फा मानिनी मृदुभाषिणी ।
स्निग्धदन्ताक्षिनखरस्थिरस्नेहे च कोमला ॥
गाधद्वारातिशिशिरमांसलस्वरमन्दिरा ।
अत्यल्पक्षुत्पिपासा च दीर्घकेशी च सात्त्विकी ॥
दीर्घबाहुलता सत्त्ववचना बुद्धिमत्तरा ।
शरकाण्डाम्बुदस्वर्णगोरोचनरुचिस्तथा ॥

End:

सन्धियुग्रोमहर्षश्च जिह्वाशोषविजृम्भणः ।
ज्वरमूर्छासितां भूयात् श्वेतकम्पत्वमस्वरम् ॥
अग्निमान्द्यप्रलापं च निद्रानासा असृक्तकम् ।
किञ्चिच्छ्वासतृषा तन्द्रा सूतिकाज्वरलक्षणम् ॥

Colophon:

समाप्तम् ॥

No. 13172. प्रमेहचिकित्सा, कर्णाटकटीकासहिता.
PRAMĒHACIKITSĀ WITH KANARESE MEANING.

Pages, 18. Lines, 5 on a page.

Begins on fol. 18*a* of the MS. described under No. 13079.

Complete.

On the treatment of Pramēha (urinary diseases).

Beginning:

नवार्कगु(द)लमद्याम्बुदधिधूमनिषेवणात् ।
दूषितं लीनयेन्मेहं शुक्लमज्जवसादिगम् ॥
* * * *
प्रमेहश्लेष्मदाहाद्याः कफवाताश्च पित्तकाः ।
वातक्षयाप्यसाध्याः स्युः कृच्छ्रसाध्यास्त्रिदोषतः ॥

End:

सप्तम्यरोचको जाड्यमष्टमी ग्रन्थिसंभवः ।
नवमी स्यादतीसारं मज्जाया दशमीक्षयः ॥
उपेक्षितानामित्येवमवस्थाः स्युः शरीरिणाम् ॥
प्रमेहमित्यपपाठः ।
* * * *

Colophon:

प्रमेहचिकित्सा ॥

No. 13173. प्रश्नोत्तररत्नमाला.
PRAŚNŌTTARARATNAMĀLĀ.

Pages, 39. Lines, 6 on a page.

Begins on fol. 42*a* of the MS. described under No. 13090.

Complete.

Same work as that described under No. 54 on pages 26, 162 to 164 of M. Seshagiri Sastri's Report No. 1. By Śrīśailanātha.

No. 13174. बालग्रहचिकित्सा, आन्ध्रटीकासहिता.
BĀLAGRAHACIKITSĀ WITH TELUGU MEANING.

Substance, palm-leaf. Size, $12\frac{1}{8} \times 1\frac{1}{8}$ and $12\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 14. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 28*a*. The other works herein are Vaidyacintāmaṇi (with Telugu meaning) 1*a*, Vaidyaviṣayagrantha with Telugu meaning 25*a*, Rasādiyōgagrantha 35*a*.

Incomplete.

On the pacificatory ceremonies and medicines for curing the ailments of babies.

Beginning:

प्रथमदिवसे प्रथममासे बालग्रहादिना वर्षेहान्यज्वरा ।

* * * *

कोद्रवान्नषडोशीरशिवनिर्माल्यगोघृतैः ।
न निम्बपत्रमार्जालारोमशैनप्रधूननम् ॥

एवं ताम्रादिचूर्णे च एवं शान्ति(ज) वारिणा ? ।
ब्राह्मणभुक्तं . . . .

End:

नागरामृताजया व्याश्रितकारी चाटकूषका ? ।
काथौ शोभहरादिवकरा . . . .

* * * *

विजयाबर्बरं चैव क्रमुकं . . विकारजित् ? ।
राज

No. **13175.** बालचिकित्सा, कर्णाटकटीकासहिता.

BĀLACIKITSĀ WITH KANARESE MEANING.

Substance, palm-leaf. Size, $6\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 10. Lines, 8 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 119*a*. The other works herein are Rasaratnasamuccaya 1*a*, Kalajñāna 94*a*, Vaidyayōga (Kanarese) 100*a*, Vaidyaviṣaya (Kanarese) 124*a*.

Apparently complete.

Similar to the above.

Beginning:

रावणमते बालचिकित्सा कथ्यते—

अथास्य प्रथमे दिवसे बालं सङ्गृह्णाति मातृकानामधेयः । तया गृहीतस्य प्रथमं जायते ज्वरः । नालरवं करोति गलं मृष्यति स्तनं गूहति महाज्वरो भवति ।

End:

अग्निदेशमाश्रित्यापराह्णे पञ्चरात्रं बलिं हरेत । ओं नमो रावणाय

* * * *

सर्पनिर्मोकगोघ्नशक्तिशिवनिर्माल्यहरितालमिति विजेयधूपः ॥

Colophon:

इति बालचिकित्सा रावणमते समाप्ता ॥

No. **13176.** बाहटग्रन्थः, आन्ध्रटीकासहितः.

BĀHAṬAGRANTHAḤ WITH TELUGU MEANING.

Pages, 77. Lines, 25 on a page.

Begins on fol. 84*a* of the MS. described under No. 13086.

Contains the first two Paricchēdas. Bound in two volumes.

A treatise dealing with the methods of diagnosing diseases and with the preparation of different kinds of medicines for curing them. It is said to have been revealed by God Subrahmaṇya, son of Goddess Pārvatī.

Name of the scribe: Mājēṭi Sarvēśaliṅga. Date of transcription: Tuesday, the 2nd of the dark fortnight of the Adhika (excess) Vaiśākha month in the year Āṅgirasa.

Beginning:

वागीशाद्यास्सुमनसः . तं नमामि गजाननम् ॥
. . . . . यमः पुण्यजनेश्वरः ।
यः प्रचेता जगत्प्राणः श्रीदश्शिव इतीर्यते ॥
यस्य प्रतापात् द्युमणिः अग्रे खद्योततां रविः ।
धत्ते कीर्तिसुधासिन्धोरिन्दुश्च जलबिन्दुताम् ॥
कामोऽपि कलशाम्भोधिकैलासहिमभूमिकाः ।

* * * *

अस्य श्रीपार्वतीयस्य प्रियसूनुर्गुणोन्नतः ।
षण्मुखे रचिते चैव बाहटग्रन्थमुत्तमम् ॥
वैद्यानां यशसेऽर्थाय व्याधितानां हिताय च ।
धत्ते धन्वन्तरिप्रोक्तं तमस्सूर्योदये यथा ॥

* * * *

आदौ समस्तरोगेषु अष्टस्थानं परीक्षयेत् ॥
नाडीस्पर्शस्वरूपं च शब्दनेत्रपुरीषयोः ।
मूत्रवर्णानि जिह्वा च एता दृश्यं(श्या) भिषग्वरैः ॥

* * * *

आलस्यं कुरुते जाड्यं कासश्वासबलक्षयम् ।
रक्तस्रावो ज्वरश्शोफा पित्तं चक्षुष्यलक्षणम् ॥

Colophon:

इति श्रीगौरीपुत्रकार्तिकेयविरचिते बाहटग्रन्थे निदानयोगो नाम प्रथमः परिच्छेदः ॥

End:

ग्रन्थान्तरे—

औषधस्य पलं दद्याज्जलस्य पलषोडश ।
पलद्वयाविशेषं स्याद्वाने क्वाथ इति स्मृतः ॥

*　　*　　*　　*

सिद्धसारे—

अष्टभागं चतुर्भागमर्धभागं विशेषतः ।
कषायेषु यवागेषु पानीयेषु यथाक्रमम् ॥

Colophon:

*　　*　　*　　*

इति श्रीपार्वतीपुत्रकार्तिकेयविरचिते बाहटग्रन्थे कषाययोगसमाप्तिर्नाम द्वितीयः परिच्छेदः ॥

No. **13177.** बाहटग्रन्थः, आन्ध्रटीकासहितः.

BĀHAṬAGRANTHAḤ WITH TELUGU MEANING.

Substance, paper. Size, 10 × 7 inches. Pages, 383. Lines, 26 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Karmavipāka 195*a*, Rasapradīpikā (Telugu) 205*a*.

Contains the following Paricchēdas:—

१. निदानयोगः.
२. कषाययोगः.
३. पथ्यापथ्ययोगः.
४. तैलयोगः.
५. घृतयोगः.
६. लेह्यवर्गसमाप्तिः.
७. चूर्णवटकयोगः.
८. औषधयोगः.
९. रसयोगः.

Same work as the above, wherein see for the beginning.

Name of the scribe: Mājēṭi Sarvēśaliṅga. Date of transcription: Wednesday, the 15th day of the bright fortnight of the Jyēṣṭha month in the year Āṅgirasa.

End:

मरीचं योऽम्लतक्रेण . . . . घटिकात्रयम् ।
लोष्टतप्तं घृतं शुद्धिर्भवेद्वैद्यविनिश्चयम् ॥

*　　*　　*　　*

अजमोदं शिलाक्षारं जलेनातपपावितम् ।
याममात्रं भवेच्छुद्धिः रसयोगेषु जायते ॥

*　　*　　*　　*

Colophon:

इति श्रीगौरीपुत्रकार्तिकेयविरचिते बाहटग्रन्थे रसयोगो नाम नवमः परिच्छेदः ॥

पञ्चकालवर्गः—

पुनर्नवीपञ्चकम् ।

पुनर्नवी विदारी च वचा ह्यतिविषामृता ।

*　　*　　*　　*

शङ्खद्रावयोगः—

प्रत्येकं पञ्चलवणं बाणं तुत्थं च खर्परम् ।
वट्टुकी कुडबार्धं च तदर्धं नवसारकम् ॥
कासीसं टङ्कणं सर्जयवक्षारं तदर्धकम् ।
कुडुबं पञ्चभूसारं सर्वमेकत्र योजयेत ॥

*　　*　　*　　*

सिता जम्बीरसंयुक्तं रसदोषनिवारणम् ।
ब्रह्मरन्ध्रप्रयोगेण बलिजम्बीरमर्दितम् ॥

No. **13178.** भारद्वाजीयम्.

BHĀRADVĀJĪYAM.

Pages, 50. Lines, 5 on a page.

Begins on fol. 118*a* of the MS. described under No. **13137.**

Incomlpete; wants the beginning.

The title implies that this work belongs to the medical system attributed to Bharadvāja, the teacher of Ātrēya, the well-known physician. The portion contained in this MS. deals with **मेह,** i.e., urinary diseases. The author makes reference to the Āyurvēda and other medical works.

Beginning:

ग्रन्थान्तरे आयुर्वेदे भारद्वाजीयप्रकरणे मेहशुक्ल आमलक्षणे असाध्यरोगनिर्णयः ।

आमशुक्लं च मेहेन वायुलिप्तेन पैत्त्यगे ।
दारकीले विनाशाय निस्राणं च शरीरगे ॥
वायुबन्धनदेहेन मेहज्वरविलिप्तगे ।
अथातो वीर्यनाशं च आमशुक्लं च लक्षणे ॥

स्वेषेन मलमूत्रवेदनाच समस्तरोगाणि भयानि सद्यः(?) ।
समस्तरोगाः क्षणमात्रनाशयेसंसेवितेद्रोगिप्रवर्तकेन(?) ॥

End:

शिरःपूरितमेहाय चलनं शिरसस्तथा ।
परशु विकारेणव(प)र्णमूलन्तु उद्धले ॥
मेहन्तरालेन क्षयेन मारुते तिक्तज्वरे लिप्तकमेहदुर्बले ।
स्वर्णे समानेन शरीरतोषणे शरीरमाद्यं दधुरुच्छतेन ॥

No. **13179.** भेषजकल्पः, सव्याख्यानः.

BHEṢAJAKALPAḤ WITH COMMENTARY.

Pages, 162. Lines, 27 on a page.

Begins on fol. 1*a* of the MS. described under No. 13078.

Complete.

On details connected with the preparation of medicines for curing diseases. The work is followed by a commentary.

Beginning:

अथातो भेषजकल्पं व्याख्यास्यामः इत्याह भगवान् भरद्वाजः ।
सिद्धौषधानां केषांचित् पृथक्कल्पप्रसङ्गतः ।
अथ भेषजकल्पोऽयं सामान्येन प्रकाश्यते ॥

अथ शिरोनेत्रवस्तिव्यापत्सिद्धिकल्पानन्तरम् । सिद्धौषधानाम् हरीतक्यादीनाम् । केषाश्चित् पृथक् पार्थक्येन कल्पनाप्रसङ्गसाधारण्येनायं भेषजकल्पोऽध्यायः प्रकाश्यते । भेषजस्य कल्पः कल्पना क्रिया प्रकटीक्रियते । आदौ तस्य भेषजस्य कल्पनाप्रशंसामाह—

देशकालानुगुण्येन संगृहीतं यथाविधि ।
स्थापितं भेषजं तैस्तैः कल्पनैरमृतायते ॥

End:

नातितीक्ष्णं नातिमृदुः श्लक्ष्णपिच्छिलशीघ्रगः ।

* * * *

एवमेवं दशगुणः । क्षारशस्त्रस्य यत्कर्म छेदनादिश्च तेजसाज्ञे(ग्ने)रपि यत्कर्म पा(दा)हाच करोतीत्यर्थः । लवणपाकमाह । श्लोकार्थः स्पष्टः ।

Colophon:

इति द्रव्यविशेषकभैषज्यकल्पं सम्पूर्णम् ॥

No. **13180.** भेषजकल्पः, आन्ध्रटीकासहितः.

BHEṢAJAKALPAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 17⅜ × 1¼ inches. Pages, 305. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

A treatise dealing with the nature and characteristics of the different kinds of diseases and with the preparation of suitable medicines for curing them. In the beginning the various kinds of fever are described. The name of the MS. given above is based on the scribe's note at the end.

Date of transcription: Tuesday, the 25th of the Puraṭṭāśi month in the year Viṣu.

Beginning:

ज्वरोत्पत्तिः—

ज्वरो रोगपतिः पाप्मा मृत्युरोजोऽशनोऽन्तकः ।
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्ध्वनयनोद्भवः ॥

* * * *

ततो वक्ष्ये त्रयोदश्याः सन्निपातस्य लक्षणम् ।
तान्त्रिकाश्चान्तिकश्चैव रुग्दाहश्चित्तविभ्रमः ॥
शीतं गात्रे तान्त्रिकं च कण्ठकूजनकर्णिका ।

End:

काथस्य कल्कस्य रसस्य यामं मासत्रयं चाञ्जनवर्तिचूर्णम् ।
षाण्मासकाभ्यां गुडलेह्यवीर्यं संवत्सरं तैलघृतप्रशस्तम् ॥

* * * *

No. **13181.** भेषजकल्पः, आन्ध्रटीकासहितः.

BHEṢAJAKALPAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 14¼ × 1¼ inches. Pages, 81. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vaidyaviṣaya (with Telugu meaning) 42*a*.

Complete.

Slightly different from the work described under No. 13179.

Beginning:

अथातो भेषजकल्पं व्याख्यास्यामः इति ह स्माह भगवान् भरद्वाजः ।
अध्यायारम्भसम्बन्धः ।

सिद्धौषधानां केषांचित् पृथक्कल्पप्रसङ्गतः ।
अथ भेषजकल्पोऽयं सामान्येन प्रशस्यते ॥
देशकालानुगुण्येन सङ्गृह्य तु यथाविधि ।
स्थापितं भेषजं तैस्तैः कल्पनैरमृतायते ॥

* * * *

देशभेदः—

देशो जाङ्गलमानूपं साधारणयते (मिति) त्रिधा ।

* * * *

जाङ्गलदेशः—

जाङ्गलो विरलात्यल्पकण्टकद्रुमकाङ्कितः ।
अल्पप्रस्रवणो दूरविगाढविरसोदकः ॥

End:

मङ्गलवाद्यादेः फलम्—

घोषणैस्तृप्तिमाप्नोति ब्रह्मविष्णुश्च शान्तिकृत् ।
दीपेन भगवाञ्छम्भुर्दिक्पाला धान्यराशिभिः ।
अश्विनौ पूर्णकुम्भेन मण्टपेन दिवाकरः ॥

* * * *

यत्र क्षीरप्रयोगश्च तत्र क्षीरं न योजयेत् ।
इत्याहुरन्यमुनयो स्नेहमित्याह बालकी ॥
स्नेहक्षीरविहीने च कर्ता च रोषणं बहु ।
तस्मात् क्षीरं युजाद लक्तानु क्षिप्ते सर्वदा (?) ॥

Colophon:

इति भेषजकल्पः समाप्तः ॥

No. 13182. भेषजकल्पव्याख्या.

BHĒṢAJAKALPAVYĀKHYĀ.

Substance, palm-leaf. Size, 15⅝ × 1⅝ inches. Pages, 66. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 7*a*. The other work herein is Dravyavaiśēṣika 1*a*.

Incomplete.

A commentary by Vēṅkaṭēśa, son of Avadhānasarasvatī of Ātrēya-gōtra on the Bhēṣajakalpa described above.

Beginning:

श्रीमान् दन्तिमुखो देवः श्रेयांसि विदधातु नः ।
तत्प्रसादेन निर्विघ्नं सिध्यन्ति कृतिनां क्रियाः ॥
अवधानसरस्वत्यास्सूनुरात्रेयशेखरः ।
वेंकटेशो वितनुते द्रव्यकल्पस्य योजनाम् ॥

अध्यायारम्भसम्बन्धमाह सिद्धौषधानामित्यादि । अथ वस्तिव्यापत्सिद्धिकल्पनानन्तरं सिद्धौषधानां हरीतक्यादीनां केषाञ्चित्पृथक् पार्थक्येन कल्पनाप्रसंगसाधारण्येनायं भेषजकल्पोऽध्यायः प्रकाश्यते । भेषजकल्पनाक्रिया प्रकटीक्रियते । तथा तस्य भेषजकल्पनाप्रशंसामाह देशकालेत्यादि ।

End:

सप्तवारात्परमनन्तरं प्रभोजसप्तरात्रं यवराशौ . . नाह स(न)तीत्यादि । नतीक्ष्णनातिमृदुश्लक्ष्णपिच्छिलः क्षिप्रगः आशुव्यापी सितः . . . . . . तं यथा भवति तथा भ्रमयित्वा , ... अस्मिन् पात्रे निषेच्य तुलादि

* * * *

अच्छिद्रेऽस्मिन् क्षारे पादावशेषिते सति तस्मिन्.

No. 13183. भेषजकल्पसारसङ्ग्रहः.

BHĒṢAJAKALPASĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, 13⅝ × 1¼ inches. Pages, 160. Lines, 4 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

This work purports to give the essence of what is contained in the different medical treatises of Bāhaṭa, Caraka, Bhōja, Bṛhadbhōja, Hārīta, Śālihōtra, Yōgārṇava, etc., in the matter of preparation of medicines.

Beginning:

बाहटे चरके भोजे बृहद्भोजे च हारिते ।
शुक्रके संग्रहे शालिहोत्रे योगार्णवे मते ॥
तन्त्रान्तरे नीतिसारे चाक्षुषे चाश्विनीमते ।
इत्यार्थे मूलमन्त्रेषु ततस्सारं समुद्धृतम् ॥
लाजापायसनारिकेलसलिलं मूत्रं जलं काञ्चिकं
द्वात्रिंशत्पलकं तदर्धमुचितं प्रस्थं रसं चौषधम् ।
क्षौन्द्रं शै(तै) लघृतस्य विंशतिपलं क्षीरस्य विंशत्पलं
दध्नः पञ्चकपञ्चकं गुडपलं चाष्टादशं चेष्यते ॥

शुण्ठीधान्यकशूल्लाजकुसुमं मांसं च सध्यं पचेत्
वल्लीकन्दफलत्वचा त्रिदिवसं मूलं तु पञ्चं पचेत् ।
सप्त द्वादशवासरे च स्वपु च काथेषु पश्चात्क्रमा-
देकाहं त्रिदिनं तु पञ्चदिवसमूर्ध्वं तथा पीडयन् ॥

End:

हिङ्गुलं चाभ्रकं गन्धं तुत्थतालकटङ्कणम् ।
. . . . . युक्तं मर्दितं कारयेद्बुधः ॥
गुञ्जामात्रवटं कुर्यात् जीरकं शर्करान्वितम् ।
एतानि खल्वयोजिकं (तं) च क्रियाहीनं चतुर्थिकम् ॥
सितांशुकरणं नामा तत्क्षणात् . . . श्चिरम् ॥
भागैकं रसगन्धमेव द्विगुणं तुल्यं च भागाष्टकं
सेलायाः त्र्यका(ता)लकद्वयमितं शुद्धं च भस्मं त्रिकम् ।
संमर्द्य चतुर्भागव्योषणमिदं पद्वयं चा (?)

No. 13184. मण्डूकब्रह्मीकल्पः.

MAṆḌŪKABRAHMĪKALPAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 100*a* of the MS. described under No. 5417.

Complete.

On the preparation of a medicine called Maṇḍūkabrahmīkalpa which is stated to have the efficacy of curing all kinds of ailments.

Beginning:

मण्डूकब्रह्मितां गृह्य शुक्लपक्षे शुभे दिने ।
पत्रमूलान्वितां शोष्य छायायां कृतचूर्णकम् ॥
क्षीरेण पिबतो मासं सर्वरोगनिवारणम् ।
मासद्वयप्रयोगेण निधानानि तु पश्यति ॥

End:

अप्रजानां च नारीणां नराणां स्वल्परेतसाम् ।
घृतं सारस्वतं नाम सारस्वत्या विनिर्मितम् ॥

Colophon:

इति मण्डूकब्रह्मीकल्पं सम्पूर्णम् ॥

No. 13185. मदनकामरत्नम्, आन्ध्रटीकासहितम्.

MADANAKĀMARATNAM WITH TELUGU MEANING.

Pages, 118. Lines, 18 on a page.

Begins on fol. 216*a* of the MS. described under No. 13124.

On the preparation of different kinds of medicines, chiefly those considered efficacious in increasing the virile power. It is attributed to Pūjyapāda. An index of the medicines is given in the end.

Beginning:

महापूर्णचन्द्रोदयम्—

घृतं सूतलोहाभ्ररौप्यं समांशं मृतस्वर्णगन्धं शिलाजित्विशङ्खे ।
स सर्वं विनिक्षिप्य खल्वे विमर्द्य ततः स्वर्णतैलोद्भवेन त्रिवारम् ॥
पचेत ततः शाल्मलीसारनिर्यासगुञ्जा प्रयुञ्जीत तज्ज्ञः सुद्दग्धानुपानैः ।
त्रिदोषक्षयं चापि हन्यादन्येषां वयस्तम्भकारी गदोन्मादहारी ॥
वधूगर्वहारी रतौ वृद्धिहारी कृतत्वापहारी कलापूर्णधारी ।
समस्तेषु योगेषु भूमौ विशेषात् प्रसिद्धो महापूर्णचन्द्रोदयोऽयम् ॥

End:

शुक्लवृद्धिकरं चैव वन्ध्या च लभते सुतम् ।
वन्ध्यनष्टं पुष्पनष्टं . . . मसृग्धरम् ॥
रक्तपित्तं चामृपित्तमस्थिस्रावहलीमकम् ।
ह(अ)हन्येव रजः स्त्रीणां भवन्ते(ति)प्रियदर्शनम् ॥
वीर्यवृद्धिकरं चैव नारीणां रमते शतम् ।
पञ्चबाणरसो नाम पूज्यपादेन निर्मितम् ॥

No. 13186. माधवनिदानम्.

MĀDHAVANIDĀNAM.

Pages, 41. Lines, 12 on a page.

Begins on fol. 3*b* of the MS. described under No. 13094.

Incomplete. Contains up to the end of Śirōrōganidāna.

A treatise on pathology: by Mādhavakara. The work has been printed in the Nirṇayasāgara press with the commentary of Madhukōśa.

Beginning:

प्रणम्य जगदुत्पत्तिस्थितिसंहारकारकम् ।
स्वर्गापवर्गयोर्द्वारं त्रैलोक्यशरणं शिवम् ॥
नानामुनीनां वचनैरिदानीं समासतस्सद्भिषजां नियोगात् ।
सोपद्रवारिष्टनिदानलिङ्गैः निबध्यते रोगविनिश्चयोऽयम् ॥
नानातन्त्रविहीनानां भिषजामल्पमेधसाम् ।
सुखं विज्ञातमातङ्कमयमेव भविष्यति ॥
निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा ।
सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ॥
निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः ।
निदानमाहुः पर्यायैः प्राग्रूपं येन लक्ष्यते ॥
उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः ।
लिङ्गमव्यक्तमल्पत्वात् व्याधीनां तद्यथायथम् ॥

End:

त्रिरात्राज्जीवितं हन्ति शङ्खको नामतः परम् ।
त्र्यहाज्जीवन्ति भैषज्यं प्रत्याख्यायास्य कारयेत् ॥

Colophon:

इति माधवविरचितायां शिरोरोगनिदानम् ॥

सुदृढं मृदुलं चर्म कृत्वाष्टाङ्गुलमुच्छ्रितम् ।
तेनावेष्ट्य शिरोवस्ति मूषां कल्केन लेपयेत् ॥
निश्चलं चोपविष्टं च तैलमुष्णं प्रपूरयेत् ।
धारयेदारुजं शान्तिर्यामं यामार्धमेव वा ॥
शिरोवस्तिर्जयेदेषां शिरोरोगं हरेद्ध्रुवम् ।

No. 13187. माधवनिदानम्, आन्ध्रटीकासहितम्.
MĀDHAVANIDĀNAM WITH TELUGU MEANING.

Pages, 31. Lines, 24 on a page.

Begins on fol. 1*a* of the MS. described under No. 13110.
Contains 56 stanzas in the Jvaraprakaraṇa.
Same work as the above.

No. 13188. यक्ष्मरोगनिदानम्.
YAKṢMARŌGANIDĀNAM.

Substance, palm-leaf. Size, 15 × $1\frac{1}{4}$ inches. Pages, 14. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Jīrṇakālapramāṇa 7*b*.
Complete.

On the symptoms, description and diagnosis of different kinds of क्षयरोग (consumption).

Beginning:

वातक्षयः पैत्त्यनामा कफक्षयत्रयाणि च ।
चतुर्थं वातपित्तं च वातश्लेष्मक्षयाणि च ॥
श्लेष्मपित्तक्षयो नाम त्रिदोषक्षयनामकम् ।
राजयक्ष्मणि नामाख्यं हरिद्राक्षयविश्रुतम् ॥
शुष्कक्षयविवर्णत्वं मन्दाग्निर्मदनानि च ।
उद्धारं क्षयविख्यातं शोषमूर्छाक्षयाश्रुणी ॥
सन्तापशोल(फ)संतापं हिक्काक्षयमरोचकम् ।
इति वै विंशतिनामा क्षयरोगं च पीडितम् ॥

End:

पाण्डुक्षयनिदानम्—

श्वास ऊर्ध्वं मुखे पाण्डु शुक्लाक्षं कर्णघोषणम् ।
मन्दाग्निं च सहृच्छूलकासश्वासगलस्तथा ॥
करपादं च दाहोऽयं मूर्च्छाकासज्वरस्तथा ।
कष्टसाध्यं ज्ञेयपाण्डु हृदि सन्तापसेवनम् ॥
कण्ठस्थानं जलूकाख्यं शीघ्रं यान्ति यमालयम् ॥

Colophon:

इति क्षयनिदानं समाप्तम् ॥

No. 13189. रक्तपित्तादिनिदानचिकित्सा, आन्ध्रटीकासहिता.
RAKTAPITTĀDINIDĀNACIKITSĀ WITH TELUGU MEANING.

Pages, 27. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13130.

Incomplete.

On the diagnosis of certain class of diseases which are due to the impurity of blood and on the remedial medicines therefor.

Beginning:

अष्टद्रव्याम्लवणं कषायक्षारवस्तुभिः ।
यकृत्प्लीहाश्रितं रक्तमूर्ध्वं चाधः प्रवर्तते ॥

*   *   *   *

वाताच्छ्यामारुणं रूक्षं शोणितं तनु फेनिलम् ।
कफतः स्निग्धमापाण्डु पिच्छिलं बहुलं बहु ॥

*   *   *   *

रसा वा खरमञ्जर्या वाशाया वाशितोत्कटः ।
निवारयेद्रक्तपित्तमधोऽङ्गं वा किमूर्ध्वकम् ॥

End:

बाह्यवातम्—

शरीरं गात्रसर्वाङ्गं सत्यं मारुतकोपनम् ।
शूलं च रोमकूपालिश्वेतं चेति तथा क्रमात् ।
पुलकं श्वासकासं च बाह्यवातमिदं क्रमात् ॥

चिकित्सा—

कषायं पञ्चकोलेन पिप्पलीमधुसंयुतम् ॥

No. **13190.** रत्नाकरौषधयोगग्रन्थः.

RATNĀKARAUṢADHAYŌGAGRANTHAḤ.

Substance, paper. Size, 10 × 6⅜ inches. Pages, 302. Lines, 32 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on foll. 13*a* and 122*a*. The other works herein are Dhanvantarinighaṇṭu 1*a*, Dravyaguṇapāṭha 100*a*.

Incomplete.

A work on the preparation of medicines of various kinds with an enumeration of the ailments cured by them. The author gives in the beginning a long list of medical works from which, he says, he has taken the essence and incorporated them in this work. There is no authority in the work for the name given to it here.

Beginning:

रसार्णवं बाहटं च पारिजातं च कौमुदी(म्) ।
नागार्जुनं च कापालि दामोदरमतं तथा ॥

रससारं सिद्धसारं सूतराजं च टङ्कणम् ।
कल्याणं भेषजंकल्पं सूत्रस्थानं च सङ्ग्रहम् ॥
कपालि बिन्दुनादं च गुणचिन्तामणिं तथा ।
शारीरं वीरभद्रं च वैद्यदीपकमेव च ॥
सोमनाथमहाशास्त्रं नन्दिनाथं चिकित्सकम् ।
रससञ्जीवनं चैव संहितासारमेव च ॥
योगरत्नावलीसूतं यामलं रसदर्पणम् ।
वैद्यमुक्तावलिं चैव रसरत्नसमुच्चयम् ॥
आश्विनेयं तद्रसेन्द्रं चूडामणिमतं तथा ।
चन्द्रज्ञानं कृष्णायां वासिष्ठं च पुरातनम् ॥
एतानि वैद्यशास्त्राणि सारमादाय वक्ष्यते ।
ज्ञात्वा श्रुत्वा च दृष्ट्वा च चिकित्सामृतरूपकम् ।
स्वर्णं तारं ताम्रनागं वङ्गं कान्तं च तीक्ष्णकम् ॥

*   *   *   *

हरितालाभ्रकं चैव शङ्खचूर्णमनश्शिला ।
मातुलुङ्गरसोपेतं जातरोम विनश्यति ॥

End:

बहुमूत्रहरं चैव तिलपिष्टेन संयुतम् ॥
मार्जालग्रन्थिरोगाणां गुलूचीमरिचं तथा ।
शुक्लवृद्धिस्तम्भमूलमिक्षुरस्वरसं तथा ॥
आरुची आर्द्रकं चैव जीरकं चूर्णसंयुतम् ।
पेरङ्गी व्याधिमूलेन अपत्यं हितमेव च ॥
झरशीचणकाज्येन सर्वरोगो व्यपोहति ।
मार्ताण्डरसनामायमश्विनीदेवनिर्मितः ॥

No. **13191.** रत्नाकराद्यौषधयोगग्रन्थः.

RATNĀKARĀDYAUṢADHAYŌGAGRANTHAḤ.

Pages, 422. Lines, 6 on a page.

Begins on fol. 61*a* of the MS. described under No. 13108.

Similar to the work described above. The work is herein attributed to Pūjyapāda.

Beginning :

पुराणराजतं भेदिएला जातिफलं तथा ।
समुद्रौ कोकिलावज्रे सममात्रेण कारयेत् ॥
कनकबीजानि पादांशं नागवल्लीपलैर्दिनम् ।
चणप्रमाणवद्रोगी भक्षयेद्वटिकाद्वयम् ॥
वीर्यस्तम्भः सप्तदिवसे यावन्नालविनाशनम् ।
कामेश्वरस्य विख्यातं पूज्यपादेन निर्मितम् ॥

End :

नागरोऽतिविषाहिङ्गुचित्रमूलं वचाभया ।
चूर्णमुष्णेन चूर्णेन अजीर्णातः पिबेच्छिशुः ॥

No. 13192. रसकच्छपुटम् , आन्ध्रटीकासहितम्.
RASAKACCHAPUṬAM WITH TELUGU MEANING.

Pages, 129. Lines, 12 on a page.

Begins on fol. 27b of the MS. described under No. 13094.

Incomplete.

A treatise on the purification of mercury and on the preparation of different kinds of mercurial powders and medicines. The author is Nāgēśa or Nāgārjuna who speaks of a Ganniraja of Bhāradvājagōtra and Vaikhānasasūtra. The author gives in the beginning a list of the names of the medical works consulted by him.

Beginning :

जगन्मङ्गलं सर्वविद्यागणेशं महाभूषितं रक्तसिन्दूरवर्णम् ।
जगद्विघ्ननिघ्नं तमानन्दपूर्णं जगन्मोहनं सर्वविद्यास्वरूपम् ॥
* * * *
हंसासनसमारूढां कुमारीं कामरूपिणीम् ।
त्रैलोक्यवरदां देवीं शारदीं चादियोगिनीम् ॥
आम्नाये जगदाराध्य शक्तवि(द्) ब्रह्मविक्रतिम् ।
यः सिद्धात्मसदेवाख्यं तं गुरुं ज्ञानदर्शनम् ॥
तार्क्ष्यं धन्वतरिव्यासं पीयूषं पारदं शुभम् ।
व्यालिनागार्जुनं चैव गोविन्दं लोकनायकम् ॥
नीरन्ध्रं रसराजं च रससत्त्वं रसार्णवम् ।
रसेन्द्रं मङ्गलं चैव रससिद्धं रसामृतम् ॥
भवानीसुतसोमं च काकचण्डेश्वरीमतम् ।
रसरत्नाकरादींश्च स्वच्छन्दं चर्पटीमतम् ॥

जिनेन्द्रस्यामृतं राजमृगाङ्करसदीपिकाम् ।
बहूनि रसशास्त्राणि दृष्ट(ष्ट्वा) लोकहिताय वै ॥
भारद्वाजसमुत्पन्नः गोत्राद्विजवरस्सुधीः ।
गन्निराजो भुवि ख्यातो वैखानसपदाङ्कितः ॥
तस्य राजस्सत्यवादी देवद्विजपरायणः ।
रसराजविधिं वक्ष्ये नागेशस्सर्वसिद्धिदम् ॥
वापीकूपतटाकानां विवरं गीतमस्तके ।
कवाटकन्दरं चैव भूमिभासितमस्तके ॥
अष्ट स्थानानि सूतानि दोषस्थानमिति स्मृतम् ।
सकलङ्कं यथा सूतो निष्कलङ्को यथा पुनः ।
नमोऽस्तु सूतराजाय येन व्याप्तं जगत्रयम् ॥
* * * *
इन्द्रगोपनिभं कान्तं दरदं रुधिरं तथा ।
क्रामणं यो न जानीते श्रमस्तस्य निरर्थकः ॥

Colophon :

इति रसकच्छपुटे नागार्जुनविरचिते सप्तकञ्चुकादिहिङ्गुल्याकृष्टिदश-संस्कारो नाम प्रथमः पटलः ॥

End :

Colophon :

इति नागार्जुनविरचिते रसकच्छपुटे घोटबन्धघुटिकाक्षीयजलूकाबन्धकादि-सर्वपाषाणलोहरत्नमारणं नाम अष्टमः परिच्छेदः ॥

प्रमेहगजकेसरी—

सूतं च वज्रभस्मं च आकुलीबीजमभ्रकम् ।
अयस्कान्तं शिलाधातुकतकस्य(च) बीजकम् ॥
गुळूचीसत्त्वमित्येषु त्रिफलाकाथमर्दितम् ।
गुञ्जामात्रं वटीं कृत्वा छायाशुष्कं तु कारयेत् ॥
शर्करामधुसंयुक्तं प्रमेहान् हन्ति विंशतिम् ।
* * * *
अग्निमूलं बलं पुंसां बलमूलं हि जीवनम् ।
एष सारश्चिकित्साया यदग्नेः परिरक्षणम् ॥

No. 13193. रसकौमुदी.

RASAKAUMUDĪ.

Substance, paper. Size, 12 × $9\frac{3}{4}$ inches. Pages, 24. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new. Complete.

This work purports to give the origin and properties of mercury, its different varieties, the method of using it in medical preparations, etc., so as to produce the desired effect. By Jñānacandra, probably also called Sarvajñacandra, a descendant of Candraśēkhara.

Beginning :

श्रीचन्द्रशेखरमुनीश्वरवंशजातः सर्वज्ञचन्द्र इति विप्रकुलोत्तमोऽस्ति ।
श्रीमन्त्रशब्दशिवलब्धवरप्रसादात् श्रीमद्यतीन्द्रविबुधेन्द्रवरात्स तस्मात् ॥
लोके सर्वभिषङ्मनोहरभिषक्शास्त्रान्धकारापहा
गुर्वी गर्वमदान्धसर्वगदचोरस्तोमरक्तान्तरा ।
सर्पाद्विवकरूपदृग्विषजराजारभ्रमघ्नक्रमा (?)
दारिद्र्याम्बुधितारणी हि रसकौमुदी ह्यक्षयं(च) दीप्यते ॥
सर्वाणि रसशास्त्राणि विमृश्य रसकौमुदी ।
ज्ञानचन्द्रेण रचिता संक्षेपेण महात्मना ॥
कवेर्नाम ज्ञानचन्द्रः तच्छास्त्रं रसकौमुदी ।
अस्य(न्यैः)रसभिषक्छास्त्रप्रकारैः किं प्रयोजनम् ॥
रसकौमुदीशास्त्रं लोकहितार्थं विविच्यते वक्ष्यामः ।
तद्देहलोहसिद्ध्यै शरीरिणां सकलसिद्धशास्त्रोक्तम् ॥
आदौ तावद्रसोत्पत्तिं सिद्धिं च लयकारणम् ।
तत्स्वरूपं च तद्भेदान् क्रमाद्वक्ष्यामि शृण्वताम् ॥

Colophon:

इति ज्ञानचन्द्रविराचितायां रसकौमुद्यां रसोत्पत्त्यधिकारः ॥

* * * *

इति ज्ञानचन्द्रविराचितायां रसकौमुद्यां रसेन्द्रशुद्ध्यधिकारः ॥

End :

श्रीचन्दनाब्जातक्कोलजातिचूर्णं तथैव च ।
क्षिप्त्वा पश्चान्नारिकेलफलनीरेण भावयेत् ॥
कृष्णगोक्षीरसंयुक्तं निष्कमात्रं तु सेवयेत् ।
शर्करानवनीतेन सेवयेदेकमण्डलम् ॥

क्षाराम्ललवणं तैलं वर्जयेत्स्त्रीषु संगमम् ।
मधुरेष्टान्नपानानि भोजयेद्दिवसत्रयम् ॥
अतिशुष्कस्य कायस्य पुष्टिं वितनुतेऽपि च ।
स्त्रीणां च पुरुषाणां च कुरुते कायवर्धनम् ॥
आयुष्करी वश्यकरी सत्त्वसन्तानकारिणी ।
रसमात्रेति विख्याता नाम्ना लोके महीयते ॥

Colophon :

इति श्रीज्ञानचन्द्रविरचिता रसकौमुदी समाप्ता ॥

No. 13194. रसग्रन्थः.

RASAGRANTHAH.

Substance, palm-leaf. Size, $13\frac{5}{8}$ × $1\frac{1}{4}$ inches. Pages, 266. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old. Incomplete.

Similar to the work described above. Contains a Kanarese commentary.

Beginning :

अथ सन्धिगः—

शोफवायुकफस्तन्द्रा शूलजागरवेदनाः ।
सन्धिगेहे सन्निपाते बलहानिश्च जायते ॥
. . . . शिरःकम्पहिंकारोऽथ सविभ्रमः ।
तमःकम्पं विजानीयादसाध्यं परिकीर्तितम् ॥

अथ रुग्दाहः—

भयप्रलापमोहाग्निमान्द्यवान्तितृषाश्रमैः ।
रुग्दाह . . . भ्यां करमन्योहनूपजाः (?) ॥

* * * *

रसो रसेन्द्रस्सूतश्च पारदो मिश्रकस्तथा ।
इति पञ्चविधो . . . . . ॥
. . . विप्रस्सितो रक्तः क्षत्रियः पीत ऊरुजः ।
कृष्णः शूद्र इति ज्ञेयः वर्णभेदश्चतुर्विधः ॥

End :

सूरणस्य पलान्यष्टौ तद्वद्भल्लातकस्य च ॥
गुडेन गुलिकां कुर्यात् अक्षमात्रप्रमाणतः
सा भक्षिता हरत्यर्शांस्यम्लतक्रानुपायिनाम् ॥

काङ्कायनेन कथिताः शस्त्रक्षारामिभीरुणाम् ।
पथ्याशतद्वयं मूत्रसंचयान् हन्ति निश्चयः ॥

No. 13195. रसभेषजकल्पदीपिका.

RASABHĒṢAJAKALPADĪPIKĀ.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 31. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Rasavaiśēṣika 17*a*, Vātarōganidāna 24*a*.

Complete.

On details connected with the preparation of mercurial powders, etc., for medicinal purposes.

Beginning:

रसभेषजकल्पदीपिकारहितस्यास्ति कथं प्रवेशनम् ।
भुवि गह्वरभेषजान्तरं प्रथमं तत्प्रथितं तु कुर्महे ॥

पुटलक्षणम्—

पुटाद्द्रवं पुटात्पाकं पुटात्कालीकनिग्रहः ।
मृदुत्वं च लघुत्वं च पञ्चैतानि पुटात्पुटे ॥

पुटपाकलक्षणम्—

भ्रष्टं यदौषधिसिक्तं पिण्डीकृत्य शरावके ।
सम्पुटीकृत्य तद्वस्त्रात् संवेष्ट्य च विवातके ॥

* * * *

पारदं दारुपाषाणं गगनं तैलमेव च ।
लवणानि च लोहानां सर्वकार्येषु विद्यते ॥

पाठान्तरे—

रसोपरसलोहानां रत्नानां वीर्यमब्रवीत् ।
संवत्सरं विना चोर्ध्वं सहवीर्यं गुणोत्कटम् ॥

End:

वालुकाद्यौषधप्रमाणम्—

पञ्चाशद्विस्वसिकतापूरितं च घटान्तरम् ।
रसादियष्टि विपचेत् वालुकायन्त्रलक्षणम् ॥
काथे सर्वाङ्गसाराणां पाककालमिहोच्यते ।
आमूलाग्रप्रयोगत्वात् मूलवत्साधु-साधयेत् ॥

मृदुमध्यमकाठिन्यात् द्रव्यमत्राथ युज्यते ।
तस्मात्सर्वाङ्गसाराणां मूलसारविधिर्हितः ॥

Colophon:

इति रसभेषजकल्पं सर्वं सम्पूर्णम् ॥

No. 13196. रसरञ्जनम्.

RASARAÑJANAM.

Pages, 40. Lines, 15 on a page.

Begins on fol. 231*a* of the MS. described under No. 1197.

Incomplete.

Restored from the MS. described under the next number.

On the preparation of certain mercurial mixtures and medicines.

Beginning:

कुङ्कुष्ठं गिरिहंसपाकरसिकं जातस्य त्रिमाक्षिकं
लाक्षारोचनकुङ्कुमं नवनिशा बिल्वं च राजापलम् ।
नागं कण्डकपत्रवेतनश्रुतं छागीमयूरोदितं
रक्तं मर्द्य पलाशकाष्ठपुटितं नागः क्षणाद्रञ्जनात् ॥
गन्धकाभ्रमरतैलेन डोलायन्त्रे विपाचयेत् ।
काचपात्रे तु संस्थाप्य लोहपात्रे विनिक्षिपेत् ॥
तद्रसैश्चैकभागं च तद्वत् क्षाराणि निक्षिपेत् ।
मातुलुङ्गाम्लपूरेण तल्लोहग्रासको भवेत् ॥
